5

6-5901-



केरळग्रन्थमाला.

1906.

विषयानुक्रमः

KOTTAKAL.



Palghat:
PRINTED BY KAMPROM BROS.
1906.

श्रीकृष्णविलासे प्रथमस्सर्गः।

अस्ति श्रिय स्सत्म सुमेरुनामा समस्तकल्याणनिधि र्गिरीन्द्रः।
तिष्ठ न्निदं विश्व मनुप्रविश्य स्वेनाऽऽत्मना विष्णु रिवोऽऽर्जितेन॥ १

मिथ स्तिरोभावविलोकनाभ्यां संक्रीडमाना विव बालकौ द्वौ।
पार्श्वेषु यस्याऽऽशु परिभ्रमन्तौ चन्द्रांशुमन्तौ नयतो दिनानि॥ २

उच्चैश्शिखः काञ्चनगौरवर्ण स्तमो निगृह्णन् महसा निजेन
दीप स्त्रयाणा मिव विष्टपानां यो भाति पर्यन्तचरत्पतङ्गः॥ ३

यस्याः पतित्वे विहिताभिलाषः करोति तीव्राणि तपांसि लोकः।
बिभर्ति रत्नाकरमेखलान्ता मंकेन पुत्री मिव यो धरित्रीम्॥ ४

महान्ति दानानि मखा नुदग्रान् पराश्चि पानाशनयो स्तपांसि।
शरीरिण श्शान्तमलै र्मनोभिः कुर्वन्ति यच्छृङ्गनिवासकामाः॥ ५

सुरा युगान्तेषु सह प्रियाभि र्निषेदिवांसो यदधित्यकासु।
उदन्वता मैक्य मुपागतानां पश्यन्ति कल्लोलशतप्रचारान्॥ ६

पुष्पाणि शय्या स्सुरपादपानां क्रीडागृहाः काञ्चनगह्वराणि।
भवन्ति च स्वर्गविलासिनीनां रत्नांकुरा यत्र रतिप्रदीपाः॥ ७

स्वर्गौकस स्स्वर्णमयीषु पीता श्श्वेतत्विषो रूप्यमयीषु भूषु।
नीला श्च नीलोपलमेदिनीषु ज्ञातुं मिथो यत्र न शक्नुवन्ति॥ ८

दरीगृहोत्सङ्गगतै रनूरोः कशाभिघातध्वनिभि स्सकंपाः।
सद्यः प्रिया नुज्झितमानदोषा स्सुराङ्गना यत्र परिष्वजन्ते॥ ९

नेतुं तपानप्रमुखी रनीशा स्स्फुटानि यत्स्वर्णगुहान्तराणि।
सिद्धाः प्रयत्नेन विना नवोढा नयन्ति नीलोपलगह्वराणि॥ १०

यत्रोऽद्यतानां कुसुमापचाये कान्तासु कल्पद्रुमवाटिकासु।
विभान्ति सुत्रामविलासिनीनां पदानि लाक्षारसपाटलानि॥ ११

पयोदमार्गव्यतिलंघिनीषु हंसा शिरःपुष्करिणीषु यस्य।
वर्षागमे प्यश्रुतमेघनादा न कुर्वते मानसदीर्घयात्रां॥ १२

छन्नेषु यस्मिन् कनकोज्वलाभि रामूलचूडं नवमंजरीभिः।
गन्धेन विज्ञाय पतन्ति भृंगा श्शृंगान्तरारग्वधपादपेषु १३

मन्दाकिनी यच्छिखरे वहन्ती कुल्यापथाभ्यन्तरसंप्रविष्टा।
बालेऽव तद्रक्षणसंप्रवृत्ता दिने दिने सिञ्चति पुष्पवाटीम्॥ १४

श्रियाऽभिराम श्शरणं सुराणा मलंघनीयो महता महिम्ना।
विराजमानो वनमालया च य श्शार्ङ्गधन्वान मनु प्रयाति॥ १५

पुरा पुराणां त्रितयं दिधक्षो रुमापतेः कार्मुकतां प्रपन्नः
मद्भयेन वज्रांकुशमत्स्यचिह्नं योऽद्यापि तन्मुष्टिपदं दधाति १६

शृङ्गाग्रभाजां सुरसुन्दरीणां मुखानि पश्य न्नमलानि चन्द्रः।
निगूहितु न्नून मुरःकळङ्कं ह्रियेऽव यत्सानुपथेन याति॥ १७

मनोभिरामे शिखरे तदीये सहोऽपविष्टं सुरसिद्धसङ्घैः।
अवोच दागत्य कृतप्रणामा कदाचि दुर्वी कमलाधिवामम्॥ १८

पुमा निवाऽहं भवतः पुरस्ता द्ब्रवीमि किञ्चि त्प्रतिपद्य धैर्यम्।
पीडा मदीया पर मत्र हेतु र्निर्लज्जता नन्वखिलोपहास्या॥ १९

सृष्टा स्त्वया दत्तवरा श्च दैत्याः भारेण मां संप्रति पीडयन्ति
बले प्रपाणे च भवन्ति येषा न्नैवो पमानं कुलभूभृतोऽपि २०

स्वविक्रमोन्मूलितराजकाना जयैषिणा मद्य परस्परेण।
तेषां रणक्षोणिषु सिंहनादै र्निर्घातघोरै र्गिरय स्स्फुटन्ति॥ २१

मुहु र्बला दुन्नमयत्यहीन्द्रे मद्भारभुग्नं फणचक्रवाळं।
मम प्रकम्पा श्चलिताब्धिशैला दिग्दन्तिनो हन्त कदर्थयन्ति॥ २२

आशामुखेषु भ्रमता मजस्रं तेषा श्चमूभिः परिसर्पिणीभिः।
तिरोहितां भानुमतो मयूखा न का पि मां सम्प्रति संस्पृशन्ति॥ २३

सन्ना स्मि दैतेयभरेण सा हं फणीश्वर स्सीदति मद्भरेण।
तद्भारशीर्यन्निजकर्परस्य चिन्त्या मवस्था कूर्मठेश्वरस्य॥ २४

भारावसीदत्फणमण्डलस्य फणीश्वरस्यो परि दुस्थिता ऽहं।
आसन्नपाता ऽस्मि तटी ऽव नद्याः प्रवाहवेगेन विलुप्तमूला॥ २५

निवेदिता देव! मया दशो ऽय मनुक्तिदोषो मयि नो ऽपपाद्यः।
निवेद्यते रक्ष्यजनेन दुःखं ततः परस्ता त्प्रभवः प्रमाणं॥ २६

इत्युक्तवत्या मुचितं पृथिव्या श्चिन्ताबलेन स्तिमितो मुहूर्त्तम्।
मुखानि पश्य न्नमृताशनाना न्देवः प्रजाना म्पति रित्युवाच॥ २७

ना ऽसत्य मेत द्य दवोच दुर्वी स्वकर्मण स्साधु फलम्मया प्तं
मद्वर्द्धिता मा मवमत्य दैत्या बला दुपघ्नन्ति जगन्ति यत्ते २८

अतीतकार्यानुशयेन किं स्या दशेषविद्वज्जनगर्हितेन॥
सुरा! स्समुन्मूलन माशु तेषां कर्तुम् यतध्वं जगतां हिताय॥ २९

सद्य स्समुत्तिष्ठत चिन्तया लं चिन्ता हि कार्यप्रतिबन्धहेतुः
यामः पृथिव्या सह तत्र यत्र नारायणो दानवकाळरात्रिः॥ ३०

अत्वे व मित्यादरपूर्व मेव स स्वीकृतोक्ति स्सुरसिद्धसङ्घैः।
सरोजजन्मा सह तैः प्रतस्थे विहायसा विश्वपते स्सकाशं॥ ३१

एलापरिष्वङ्गलसत्तमालं वेलाधिरूढस्खलदूर्मिमालं।
ददर्श धाता मनसो नुकूलं पयःपयोधे रचिरेण कूलं॥ ३२

ददर्श च क्षीरमयं समुद्रं कैलासशृङ्गोन्नतफेनकूटम्।
पुण्यं पयः केळिसमुत्सुकानां श्रिय स्सखीना मवगाहनेन ३३

आनन्दयामास दिवौकस स्ता नाघ्रातशेषो मुनिमण्डलेन।
प्रकामपुण्यः पवनोपनीतो वैकुण्ठवक्षस्तुळसीसुगन्धः॥ ३४

गन्धानुसारेण विसृष्टनेत्रै र्हिरण्यगर्भप्रमुखै रमर्त्यैः।
नवार्ककल्पं ददृशे मुरारे र्वक्षस्थलीकौस्तुभरत्नधाम॥ ३५

अपह्नुताशेषमनोविकारं दिवि स्पृशां तूर्यरवेण मिश्रम्।
आकर्ण्य वैकुण्ठविलासिनीनां गीतध्वनिं हर्ष मयासिषु स्ते॥ ३६

आसत्ति मालक्ष्य विनीतवेषा स्स्वमौलिविन्यस्तकरा स्सुरा स्ते।
आलोकयामासु रशेषनाथं सविग्रहं पुण्य मिव प्रजानाम्॥ ३७

प्रवृद्धहेमाभरणप्रकाश न्तमालनीलं जलधौ शयानम्।
तटिल्लताढ्यं पयसोऽतिपाना द्नीश मुद्रन्तु मिवाऽम्बुवाहम्॥ ३८

तरङ्गवातेन पयःपयोधे रापूर्यमाणं करपाञ्चजन्यम्।
वामेन तिर्य ग्वलता सलीलं संभावयन्तं मुहु रीक्षणेन॥ ३९

प्रतिक्षणं प्रेमविशेषजाभि स्संभावनाभिः कमलासनायाः।
पुराऽऽत्मना कल्पित मंबुराशेः प्रमार्जयन्तं मथनावमानम्॥ ४०

पर्यायतः पाणिधृतं सरोजं विन्यस्य विन्यस्य दृशोः पदव्याम्।
निद्रां प्रबोध ञ्च मुहु र्नयन्तीं पद्मासनां सस्मित मीक्षमाणम्॥ ४१

स्वच्छस्वदेहप्रतिबिंबितेन फणाश्मजालेन फणीश्वरस्य।
भास्वत्फलस्तोमनिरन्तरस्य वहन्त माभां वटपादपस्य॥ ४२

अजस्र मासीनरथाङ्गशङ्ख मतिप्रसन्नं कमलाधिवासम्।
सन्तापविच्छेदकरं प्रजानां हृद म्महीयांस मिवाऽभिगम्यम्॥ ४३

वक्तु म्मिथो राहुविचेष्टितानि कर्णद्वयाभ्यर्ण मुपेयिवांसौ।
अलब्धकाला विव भानुचन्द्रौ रथाङ्गशङ्खौ दधतं कराभ्याम्॥ ४४

द्वारस्थसेनापतिचोदितेन निवारिताः कञ्चुकिमण्डलेन।
सुराः प्रमोदस्खलितै र्वचोभिः स्थित्वैऽव ते व्योमनि तुष्टुवु स्तं॥ ४५

नमः परस्मै पुरुषाय तुभ्यं गिरां धिया मप्यपथि स्थिताय।
अस्मान् पुन स्त्रातु मुदग्रमोहान् कृपाबला त्कलिपतविग्रहाय॥ ४६

भागीरथी पादकुशेशया त्ते विनिर्गता विश्व मिदं म्पुनीते।
क स्त्वा म्पुन र्भावयतो जनस्य शुद्धिं परिच्छेत्तु मल म्मनीषी ४७

अनन्तशक्ते रपविक्रियस्य तिस्र स्त्रिलोकीश्वर! शक्तय स्ते।
वितन्वते स्थावरजङ्गमाना मुत्पादनक्षेमविलोपनानि ४८

कटाक्षमात्रेण भवाम्बुराशेः पार म्परं प्रापयितु स्त्रिलोकीम्।
सक्र न्नमस्या पर मातर स्ते यत्नानुरूपं हि फलं क्रियाणाम्॥ ४९

त्वं ज्योति राप स्त्व मसि त्व मुर्वी त्वं व्योम वैश्वानरसारथि स्त्वम्।
त्वं जीववर्गः परम स्त्व मात्मा य न्नाऽसि किं न्नाम जगत्पते! तत् ५०

नवाभ्रवर्णं नळिनायताक्षं पीताम्बरं हारकिरीटिनं त्वाम्।
वय न्तु सेवेमहि वीक्षमाणा स्सायुज्य मन्विच्छति क स्सुखार्थी ५१

अल न्न निर्देष्टु मियत्तया त्वा मशेषनाथ! श्रुति रप्रिमाऽपि।
स एव साक्षात्क्रियसे पुन स्त्व महो जित न्न स्सुकृतै रनल्पैः॥ ५२

तृणाय मत्वा निखिलानि शार्ङ्गिन्! पदानि वैधेयमनोहराणि।
आवृत्तिशून्यं परमं पद न्ते वाञ्छन्ति वैराग्यधना महान्तः ५३

इति स्तुतो देवगणेन देवो दयानिधि र्दानवकाळरात्रिः।
न्यषीद दुत्थाय भरावभुग्ने भुजङ्गतल्पे भुवनैकनाथः॥ ५४

विष्वक् स वैकुण्ठविलासिनीनाम् सलील मान्दोलितचामराणम्।
निवारय न्नग्रकरारविन्दैः कोलाहलं काञ्चनकंकणोत्थम् ५५

प्रसादवत्या कमलासनादीन् सुरा नशेषा ननुगृह्य दृष्ट्या।
उवाच वाच न्दशनाम्शुपूरैः समेधयन् दुग्धमयं पयोधिं॥ ५६

अधिज्यकोदण्डधरो निषङ्गी सन्नाहवान् पाणिधृतैकबाणः।
अयं समाजो भवतां द्विषद्भ्यो भयं ममावेदयति स्फुटं मे॥ ५७

अलं विलंबेन दिवौकस! स्त ष्विय्यधुना मय्य कुतो भयं वः।
अयं करो दुष्टवधोत्सुकं मे सुदर्शनं न क्षमते निरोद्धुं॥ ५८

इत्यूचिवांसं परमं पुमांसं नत्वा शिरोभि र्बहुश स्सुरा स्ते।
आरूढहर्षातिशया स्स्व मर्थं मारेभिरे वक्तु मशेष मेव॥ ५९

निवार्य सर्वा नपि वक्तुकामान सेनापति स्ता नमरान् करेण।
सविभ्रमप्रेरितया पुरस्थं दृष्ट्या सरोजासन माजुहाव॥ ६०

अथाऽऽगत स्तन करे गृहीत्वा नीतः प्रभो रन्तिक मब्जयोनिः।
वक्तुं नियुक्त स्स कृतप्रणामो विज्ञापयामास विनीतवेषः॥ ६१

वयं त्वया दत्तविभूतयोऽपि मोहातिरका द्भिमन्यमानाः।
कृच्छ्रे पुन स्त्वां शरणं व्रजन्तो हा निस्त्रपाणां प्रथमे भवामः॥ ६२

अपारदुःखार्णवपोतपात्रीं त्वया कृपा मुद्वहताऽतिगुर्वीम्।
कृतघ्नताजन्मभुवा ममीषा मस्माक मर्थे न कि मन्वभावि॥ ६३

मनखिलोकस्य विगर्हणीये प्रतिग्रहे वर्जयता जुगुप्साम्।
पुरा पुरस्ता द्बलिदानवस्य प्रसारितो नाऽग्रकर स्त्वया किं॥ ६४

दैत्याधिराजेन हिरण्यानाम्ना पर्याकुलं वातु मशेषलोकं।
इदं तु दिव्यं परिहृत्य रूपं न त्वं कि मासी र्नरातिर्यगात्मा॥ ६५

स्वविक्रमाक्रान्तसुरासुरस्य रक्षःपते र्निग्रहणादरेण।
भूत्वा सुतः पङ्क्तिरथस्य राज्ञ स्ता न्ता मवस्थां न किं मन्वभू स्त्वं॥ ६६

अनेकधा पालयितार मेवं सम्प्रत्य पि त्वां शरणं प्रपन्नाः।
सन्तापकारी ननु चातकानाम् भूयो पि भूयो पि पयोद एव ६७

विश्वं बिद न्नप्य विद न्निव त्वं नाथा नुयुङ्क्षे भयहेतु मस्मान्।
अनुग्रहस्यै व दपि प्रभूणाम् मागः प्रकारान्तर माश्रितेषु ६८

तपोभि रुग्रै र्भगवन्! सुराणा मवध्यभावं दनुजाः प्रपन्नाः।
पाताल मुर्वीं श्च विजित्य दर्पा दुपक्रमन्ते दिव मद्य जेतुम्॥ ६९

न जातु शून्यः कुलिशेन पाणि र्वक्षो न मुक्तं मणिकङ्कटेन।
शक्रस्य दैत्यागतिशङ्किनोऽस्य नाऽसज्जित स्तिष्ठति वारणेन्द्रः॥ ७०

दण्डं यमात् पाश मपा मधीशात् खड्गं कुबेरात् कुलिशं मघोनः
आदातुकामः प्रहिणोति दूतान् कस स्स्वदो र्विक्रमनिर्जिताशः ७१

रणे विनिर्जित्य बलं सुराणां पराक्रमेणाऽप्रतिमेन वीरः॥
भोजेश्वरः क्रीडति सावरोधो मूलेषु सम्प्रत्य मरद्रुमाणम्॥ ७२

धनुर्धराध्यासितवप्रशीर्षा द्वाः पालनव्यग्रसमग्रयोधाः।
प्रवीरनिर्भर्त्सितकान्दिशीका स्स्थातुं न जानाति पुरी सुराणाम्॥ ७३

हा हेऽति विक्रोश दनाथ मेत द्विश्वं जगत् पीडयतः प्रकामम्।
त्वया विनाऽन्य स्त्रिषु विष्टपेषु न कर्त्तु मीष्टे नरकस्य भङ्गम्॥ ७४

प्रलम्बकेशिप्रमुखा स्तथाऽन्ये परस्सहस्रं परियन्ति दैत्याः
निर्घातकल्पै र्निजसिंहनादै र्विदारयन्तो वियदाहवेषु ७५

षड् सूनव स्सन्ति हिरण्यनाम्नो दैत्यस्य पाताळतलाधिवासाः।
तै र्न क्रियन्ते दुरितानि यानि वक्तु न्न शक्यानि मुकुन्द! तानि ७६

तेषा म्महीध्रप्रतिमाकृतीनाम् भारं मही सोढु मसा वशक्ता।
अस्मान् पुरस्कृत्य भवत्सकाशम् प्राप्ता निजक्लेशनिवेदनाय ७७

त देत दावेदन मस्मदीयम् श्रुत्वा प्रमाणं प्रभु रित्युदीर्य।
विधि र्व्यरंसी द्विहितप्रणाम स्स चाऽपि गंभीर मुवाच देवः॥ ७८

अलं विषादेन दिवौकसो! व स्समीहितं हस्तगत म्मनुध्ध्वम्।
व्रतं हि मे केवल मेत देव संरक्षणं य च्छरणागतानाम्॥ ७९

मा मर्थयन्ते वसुदेवपत्न्यौ पत्नी च नन्दस्यसुतं गुणाढ्यम्
अंशद्वयेन व्रतकर्शिताङ्गी स्तिस्रोऽपि ताः पुत्रवती र्विधास्ये॥ ८०

इय ञ्च लोकत्रितयस्य माता मायाभिधाना मम शक्ति रग्र्या।
कार्याणि वः कान्यपि कर्तुकामा जनिष्यते जन्मविनाशशून्या॥ ८१

तत् गच्छत स्वर्ग मपेतखेदा न कालहानिः परिशङ्कनीया
अनेन शार्ङ्गेण शपे शरै र्वं स्सद्यो मनश्शल्य मपाकरिष्ये॥ ८२

इति त ममरलोकं सान्त्वयित्वा स देव
स्सपदि नवघनाभः पद्मनाभ स्तिरोभूत्।
स च विहितनमस्य स्तस्य वाचं प्रशंसन्
निजपद मभिपेदे हर्षपर्याकुलात्मा ८३

इति कृष्णाविलासे
प्रथमस्सर्गः॥

अथै कदा पुत्रफलानि सम्य ग्व्रतानि बाह्योपवने चरन्तीम्।
रथेन कंसो वसुदेवयुक्त स्स्वसार मालोकयितु मगाम॥ १

स्फुरत्प्रभापल्लविताङ्गयष्टिं कथञ्चि दूढस्तनमञ्जरीकाम्।
तत्राऽळकै ष्षट्पदिनी मजानात् स तां लतामद्ध्यगता श्चिरेण॥ २

सा सन्नताङ्गी नियमावसाने ज्येष्ठाय तस्मै विदधे नमस्याम्।
स चाऽऽशिषा ता मनुगृह्य साध्वीं भोजेश्वरो वाक्य मिदं बभाषे ३

अद्याऽपि बालाऽसि सुता ननेकान् प्रसोष्यसे किं व्रतयातनाभिः।
पश्याऽधुना पल्लवसूतिकाले किं कल्पते चूतलता फलाय ४

कृशाऽसि कामं विरम प्रयासा न्मनोभिरामा ननुभुङ्क्ष्व भोगान्।
अङ्गानि ते सन्नतगात्रि! दुःखं मृणालकल्पानि कथं सहेरन् ५

ता मेव मुक्त्वा स तु साभ्यनुज्ञाम् रथं समारोप्य सहै व पत्या।
प्रयातुकामः पुर मन्तरीक्षे शुश्राव वाचं शतधारकल्पाम् ६

त्वदन्तिकस्था सहजाशमी यम् प्रसोष्यते पुत्रमयं कृशानुम्।
मरुत्समिद्ध स्स तु दुर्निवार स्त्वां भस्मसात् कंस! करिष्यती ति ७

निशम्य तत् भूतवचो निकामं कंस स्स रोषागमदुर्निरीक्षः।
कृपां परित्यज्य कृपाणपाणि स्स्वसु र्वधाय स्वय मुद्यतो भूत्॥ ८

नृशंसकृत्ये नितरां प्रवृत्त मुदग्रकोपस्फुरिताधरोष्ठम्।
प्रसादय न्नानकदुन्दुभि स्त मुवाच धीमा नुपपत्तियुक्तम् ९

अल न्तवा नेन वधोद्यमेन त्वया विधेयो नृपते! विमर्शः।
किं मेष ना श्रावि विचारशून्यम् व्रजन्त्य नर्था इति साधुवादः १०

भयेन युद्धेषु पुरन्दरादीन् सुरान् पराच स्त्रपया विमुञ्चन्
महीश्वर! स्त्रीवध[illegible]स्मिन् कथं तवो पक्रमते कृपाणः ११

अनेन किं वा तव जीवितेन यदक्षणं स्यात् सहजावधेन।
गुणेन केना पि हि लब्धनाम्ना मपि स्वनाशा दयशो गरीयः॥ १२

प्रपद्यमानस्य सदाऽभिवृद्धिम् दिवानिशं प्रीणयत स्त्रिलोकीम्।
भवद्यशश्चन्द्रमसोऽस्य मा भू न्नवः कलङ्को भगिनीवधेन १३

स्वसु र्वधेनाऽस्य भवे दकीर्त्ति रेन न्त्यजेयु स्सुहृदोऽपि भीताः।
इत्ये ष नूनं भुजनिर्जितै स्तै स्सुरैः प्रयुक्त स्सुमहा नुपायः॥ १४

कालेन त द्रक्ष्यसि य न्मदुक्तम् मा भू त्तवाऽस्मि न्विषये विशङ्का।
तथाऽपि चेत स्तव शङ्कते चे दाकर्ण्यता न्तर्ह्य परः प्रकारः १५

सर्वाण्य पत्यानि वशे तवाऽहं जातानि जातानि समर्पयिष्ये।
तन्निग्रहं वा तदनुग्रहं वा विचिन्त्य कर्तासि दशानुरूपम्। १६

किं बुद्धिमान्द्येन निजेन तस्य किं भागधेयेन वराङ्गनायाः।
बलेन किं वा भवितव्यताया स्तथेऽति जग्राह वच स्तदीयम्॥ १७

वधप्रवृत्तो वसुदेवमन्त्रप्रभावसंस्तंभितघोरकर्मा।
निवृत्य निस्त्रिंशमहाभुजङ्गो महीभृतः कोशबिलं विवेश॥ १८

सत्या नु सा स्या दशरीरिणी वाक् सत्य ङ्कि मेत द्वसुदेववाक्यम्
वितर्कय न्नेव मुदस्तकेतुं पुरीं प्रपेदे मणितोरणाढ्याम् १९

आलोकनै र्मौळिषु भूपतीना मासञ्जय न्नञ्जलिबन्धनानि।
स वैमनस्येन मुखस्थितेन भयावह स्स्वं भवन ञ्जगाम २०

विशङ्कमान स्स्वगृहोपकण्ठे तौ सद्मनि क्वाऽपि विधाय गुप्तौ।
पराक्रमाक्रान्तसमस्तलोकः पुरेऽव भोगा नय मन्वभुङ्क्त। २१

माया हरे स्साऽथ हिरण्यपुत्रान् या न्देवकीगर्भगता नकार्षीत्
भोजेश्वर स्सत्वर मेत्य भीत्या ता ञ्जातमात्रा नवधी त्क्रमेण॥ २२

जगद्विभूत्यै परमस्य पुंसो यो देवकीगर्भ मविक्ष दंशः।
आकृष्य तस्मा न्मुरवैरिमाया तं रोहिणीगर्भगत ञ्चकार॥ २३

चकास सत्पच्छदपाण्डरेण सुतेन सा गर्भतिरोहितेन।
वलाहकान्तर्हितशीतभानो र्दिशो दशां वृत्रजितः प्रपन्ना २४

तत स्समाह्लादन मीक्षणाना मसूत पुत्रं शरदिन्दुकल्पम्।
प्रकर्ष माप ह्युदयेन यस्य सद्य स्समुद्रा इव सत्ववन्तः २५

पत्यु स्समादिष्ट मिदं विधाय शेषं चिकीर्षु स्सुरकार्य मार्या।
चराचराणा ञ्जगतां सवित्री सा श्रद्दधे जन्मभुवं यशोदाम्॥ २६

अथ प्रजाना मभिवृद्धिकामो देवो दयायाः किल जन्मभूमिः।
स्वजन्मने जन्मविनाशहेतुः प्राप्य स्सतां प्राप स देवकी न्ताम्॥ २७

कृशावलग्ना कुचयो र्गरिम्णा सा देवकी सन्नतगात्रयष्टिः।
जगत्रयीपुण्यकृतावलम्बा बभार गर्भेण जगन्निवासम्। २८

अन्त र्दधाना सरसीरुहाक्षं स्वेनाऽवतारेण भुवं पुनाना।
सा देवकी सा च कवेरकन्या मिथोऽदधाता मुपमानभावम्॥ २९

अलं निवासाय न यस्य विश्वं वसन् स गर्भे मुमुदे मुकुन्दः।
परोपकारप्रभवं हि दुःखं पुंस स्सुखायै व महत्तरस्य॥ ३०

बहि स्स्फुरन्त्या करपाञ्चजन्यत्विषेऽव विष्णो रुदरस्थितस्य॥
अधत्त तस्या स्तपनीयवर्णा मधूकपुष्पच्छवि मङ्गयष्टिः ३१

बभार हारं कुचयो र्न तन्वी न पादयो र्न्नूपुर मामुमोच॥
दधौ मणिं भारभिया न मौलौ त देव कैवल्य मभूषय त्ताम्॥ ३२

दृशः प्रयत्नेन दधौ तिरश्ची रुवाच मन्दं निभृत ञ्जहास।
शनै र्ययौ दत्तकरा सखीभि र्भृश न्निशश्वास च तावतै व ३३

सहैऽव हर्षेण सुधाशनानां सहै व पुण्येन वसुन्धरायाः।
भयेन भोजाधिपते श्च देव स्सहै व गर्भे ववृधे मुकुन्दः॥ ३४

शिरोभि रूढेन वनस्पतीनाम् फलोपहारेण निवेदितर्द्धिः
प्रावृट्-समासादितसूतिकाला न्ता न्देवकी न्द्रष्टु मिवा जगाम॥ ३५

अर्थेऽकदेशा इव वारिराशे रुच्चैःपुरोमारुतविप्रकीर्णाः।
वृता स्तटिद्विद्रुमवल्लरीभि र्विरेजिरे व्योमनि वारिवाहाः ३६

वलाहकव्रातभवै स्तमोभि र्दिनेषु दुर्बोधपुरस्थितेषु।
न कश्चि दासी दभिसारिकाणाम् विद्युत्प्रकाशेन विनाऽन्तरायः ३७

पयोदभस्त्रान्तरनिर्गतेन झाटकारिणा चण्डसमीरणेन।
वियोगिना श्चेतसि मेघकाल स्सन्धुक्षयामास मनोभवाग्निम् ३८

स्मरेण लोकत्रितयेश्वरेण संभाविता ज्जीवितनिर्विशेषम्।
ऋतो र्वसन्ता ज्जलदागमस्य जहार जाति र्न्निखिल न्निकर्षम् ३९

बला त्गृहीता इव वैतसीभि श्शाखाभि रारूढमदा इवोऽच्चैः।
परिस्खलन्त्यो निखिलास्तटिन्यो जग्मु, र्ज्जवा, दुत्भटफेनहासाः ४०

उदारसौरभ्यवशीकृताना मन्वीयमानः पटलैरळीनाम्।
अकल्पयत् केतकमातरिश्वा मनोभवस्याऽपि मनोविकारम् ४१

अत्यम्बुपानप्रभवस्य कर्तु मन्तर्जटिम्नः प्रतिमंविधानम्।
पपु स्तिरस्कारपदेन मेघा मयूखमाला मरविन्दबन्धोः॥ ४२

रराज खर्ज्जूरफलप्रकाशं नवं पयः काननपल्वलेषु।
पयोदवृन्दैः परिपीय मुक्तम् प्रभाकरस्ये व मरीचिजालम् ४३

महीभृता म्मूर्द्धसु दत्तपादं विलोक्य मित्रं विहतप्रतापम्
मग्ने जले मर्त्तु मिवाऽरविन्दे मधुव्रता श्चुक्रुशु रन्तरीक्षे॥ ४४

निषेव्य हंसा मधुरै र्वचोभिः पद्माकरं लब्धसमीहितार्थाः।
मद्यो ययु स्तस्य विपत्तिकाले जलाशयानां प्रकृतिः किलै षा ४५

प्ररूढसस्याः फलमूलशाकै र्न्निरन्तरा स्वादुनवोदकाढ्याः।
वल्लीजुषा श्चेतसि पामराणां धृतिं परा मादधिरे वनान्ताः ४६

श्री र स्तु.

आ श्च र्य चू डा म णिः

प्रथमोऽङ्कः

नान्द्यन्ते ततः प्रविशति सूत्रधारः.

वीचीस्थाने सहस्रं मरतकपरिधस्पर्धि बिभ्रत् भुजाना
मुत्फेनो हारजालै ररुणरुचि रनन्ताहिरत्नप्रभाभिः

हरिश्श्रीगणपतये नमः अविघ्न मस्तु श्रीगुरुभ्यो नमः प्रस्तावे कर्म्मणां यस्य प्रमाणं कुर्वते बुधाः प्रत्यूहाना न्निवृत्यर्थं त न्नमामि गजाननम् १

गुरवो नः प्रसीदन्तु गुरुकारुण्यशालिनः अन्तेवासिमनःपद्मसमुन्मीलनभास्कराः ॥२॥

अथ नाटकारंभे शिष्टाचार मनुविदधानः कवि र्नाट्यादौ सामाजिकजन मनु प्रवक्तव्य माशीर्वाद न्निबध्नाति **वीचिस्थानइत्यादिना** अस्य च कविना नर्त्तकमुखेन देवतास्तुतिरूपमङ्गळपूर्वकं कृतस्याऽऽशीर्वादस्य नाटकनिबन्धनाविघ्नपरिसमाप्तिः फलम् नर्त्तकस्य च नाट्यादौ तत्कीर्त्तना दात्मना प्रयुज्यमानस्य नाट्यप्रयोगस्याऽविघ्न परिसमाप्तिः अत्र च नान्द्यन्ते ततः प्रविशतीत्युक्तया नान्द्याः कृतत्वेनाऽनूद्यमानत्वात् कथासूत्रकारस्यैवाऽय माशीर्वादः न नान्दी सूत्रधारस्य तथाचोक्तं "प्रसाद्य रङ्गा न्निष्क्रामे त्सूत्रधार स्सहानुगः प्रविश्य तद्व दपरः काव्यार्थं स्थापये न्नटः" इति नान्द्यन्ते प्रविशती त्युक्ते नान्द्यन्त एव प्रवेशः न तु ततः पूर्व मित्यर्थस्याऽविधेयत्वा न्नान्द्याः पूर्वकृतत्व मेव सिद्ध्यति नप्रवेशस्याऽऽनन्तर्य इत्यत उक्तं तत इति आनन्तर्योक्तया च अनन्तरं कर्म्मानुष्ठाननिरासो व्यज्यते तेन च नान्दी मारभ्य भरतवाक्योक्तेः प्रयुज्यमानानां नाट्यकर्म्मणां परस्परसंबन्ध स्सूचितः अनुकार्यतादात्म्यबुद्धिगोचरस्य नटस्य प्रेक्षकैः प्रत्यक्षेण वर्त्तमानतया गृह्यमाणत्वा त्सर्वत्रै व प्रविशतीति वर्त्तमाननिर्देशः अल्पाक्षरमनेकार्थं सारवत् गूढनिर्णयं अस्तोभ मनवद्य ञ्च वाक्यं सूत्रं प्रचक्षते इत्युक्त लक्षणं सूत्रं वाक्यं धारयती ति सूत्रधारः एवं प्रविष्टेन सूत्रधारेण सामाजिकहृदयावर्जना

बिभ्राण स्तनु मन्त श्चर मचर मनिर्वाणीय श्च तेजः
पायाद्व श्शार्ङ्गधन्वा शयित इव समुद्रैकदेशे समुद्रः ॥१॥

थे मार्शीर्वाद ष्क्रियते शार्ङ्गधन्वा व: पाया दिति अत्र अधिकृतानधिकृतयो रधिकृते प्रतिपत्ति र्गरीयसी ति न्यायेन रामरूपस्य नारायणस्यैव नाटके नेतृतयाऽधिकृतत्वात् सर्वदेवात्मकत्वेन च भगवत: पात्रत्वेन निर्देश. तत्राऽपि शार्ङ्गधन्वे त्यनेन जगद्रक्षण सन्नाह न्दर्शयति रक्षणे प्रार्थ्यमाने रक्षणोद्युक्तस्यैव दैवतस्याऽनुस्मरणं युक्त यादृशो यस्य संकल्प: तादृशं न्तु फलं स्मृत मिति न्यायात् धनुष श्चेत्यनङ् प्रत्यय: समासान्त: संबो- धनेन विना व इति युष्मच्छब्दप्रयोग स्तत्कार्यस्याभिऽमुख्यस्य विद्युत्त्वा दिति मन्त- व्यं सामाजिकानां हि नूतनोत्कृष्टनाटककार्यस्यास्वादिनां तत्प्रयोगदर्शनकुतूहलित्वेन नाट्यकर्म्मनिपुणनटवरदर्शनभाव एवाऽऽभिमुख्यं रक्षणं पाया दिति स्वप्रभावेनैव लब्धसर्वार्थत्वा त्तेषां पाल मेवाशासितव्यं न त्वलब्धस्य लाभ इति दर्शितं अल कथ मनुप्रास्येन नर्तकेनाऽनुग्राहकसामाजिकविषय आशीर्वाद: क्रियत इति चेत् तदाश्रयत्वा देव तद्रक्षण माशास्यत इति ब्रूम: स [illegible] तदाश्रयतत्तद्विशेषाय स्तत्रक्षण माशास्त इति युक्तम् अथवा सर्वस्यैव जगतो रक्षणस्य कर्म्मस्थितिनिबन्धनत्वात् क- र्म्मस्थित श्च तदधीनत्वा त्तद्रक्षण माशास्यते यथोक्त " अग्नौ प्रास्ता हुति स्सम्यगादि त्य मुपतिष्ठते आदित्या ज्जायते वृष्टि र्वृष्टे रन्न न्तत: प्रजा " इति स्वतो निष्कलस्य भगवत: तत्तत्साध्यानुगुणत्वेन परिकल्पितेषु बहु पु मूर्तिभेदेपु प्रधानभूतमूर्त्तिभेद न्दे- शावस्थाविशेषा श्चानुसंधानार्थं विशिनष्टि समुद्रेति क्षीरसमुद्रस्यैकदेशे शेषे शयित स्समुद्र इवेति अपर श्शब्दजलमय स्समुद्र इव क्षीरसमुद्रापेक्षाया म्मरतकपरिघस्पर्द्धी त्यस्याऽसंगति: स्यात् अत्र श्रौती पूर्णोपमा लङ्कार: तथाह साधर्म्म्य मुपमाभेदे पू- र्णा लुप्ता च साग्रिमा श्रुत्यार्थी च भवे द्वाक्ये समासे त द्धिते तथा इति यथा भगवत स्समुद्रसाधर्म्यं सिद्ध्यति तथा विशिनष्टि वीचीस्थान इत्यादिना षड्भि र्विशेषणै: मर तकपरिघस्पर्द्धि मरतकमयै: परिघै: स्पर्द्धितुं शील मस्य भुजानां सहस्रं वीचीस्थाने क्षिप्त दिति शयितस्य भगवत उपरिभागवृत्त्या सङ्ख्याबहुत्वा न्मरतकसमानवर्णत्वा च्च वीचीसाधर्म्यं भुजाना मुक्तं हारजालाना न्धावल्या दूर्ध्वदेशवर्त्तितया च फेनसादृश्या- त् भगवत फेनत्वारोप: अनन्तस्याऽ शेषस्य अनन्ताना महीना ञ्च रत्नप्रभाभि [illegible] श्लेषोऽलङ्कार: यथोक्तम् वाच्यभेदेन भिन्ना यद्युगपत् भाषणस्पृश. श्लि- ष्यन्ति शब्दा श्श्लेषोऽसा वक्षरादिभि रष्टधा इति शङ्खं बिभ्राण इति समुद्रविशेषणत्वप-

सूत्रधारः. (परिक्रम्य. नेपथ्याभिमुख मवलोक्य) आर्ये ! इत स्तावत्
प्रविश्य नटी.—

१. नटी—अज्ज ! इअह्मि

१. आर्य ! इय मस्मि.

क्ष ग्रहणैकत्वमविवक्षितं एत च्च भुजान्तरवर्त्तिना मायुधान्तराणा मुपलक्षणं भगवत्-
भुजानां सहस्रायुधभृत्त्वं जगद्रक्षकत्व ञ्च प्रसिद्ध मेव यथोक्तं विश्वत्राणैकदीक्षा स्त-
दनुगुणगणक्षत्र निर्म्माणदक्षाः कर्त्तारो दुर्निरूपाः स्फुटगुरुयशसा कर्म्मणा मत्भुता-
नां शार्ङ्ग बाण ङ्क्रपाणं फलक मरिगदे शङ्खपद्मौ सहस्रं बिभ्राणा श्शाङ्खज,
ल म्मम दधतु हर बाहवोमोहहानिम्. अन्तः उदरेचराचरात्मकञ्जगत्बिभ्राणः नच
प्रलयकाल एव भगवतस्तादवस्थ्य मिति वाच्य कृष्णेन स्थितिकाले पि आत्मोदरे
सकललोक विस्तारस्य स्वमात्रे दर्शितत्वात् अस्य समुद्र विशेषणत्वे स्थावरान् पर्व-
तवनादीन् जंगमांश्चल मानुषादीं श्च बिभ्राणः अत्राप्येकत्व मविवक्षितं अन्तर्हृदये
अनिर्वापणीय मविना नित्यं सच्चिदानन्दं ब्रह्मज्योति बिभ्राणः अन्यत्रौ र्वाग्निं अत्रा-
र्थश्लेषालंकारः देशतः कालतोवस्तुत श्चापरिच्छेद्यस्यात्मज्योतिषो हृदये बिभ्राण इति
देशपरिच्छेदः काल्पनिक इतिज्ञेयं एवं विशेषणै र्भगवत स्समुद्रसाधर्म्ये सिद्धे समुद्रैक
देशे शयितस्समुद्र इवे त्युपमा वाक्यस्था वृत्या उत्प्रेक्षालकारो प्याश्रीयते प्रकृतस्य
भगवत स्समुद्रत्वे न संभाव्य मानत्वात् यथोक्तं. संभावनमथो त्प्रेक्षा प्रकृतस्य समेन
यत् इति अत्र शार्ङ्गधन्वे त्यनेन जगद्रक्षणो त्साहत्वेन शार्ङ्गधनु र्विशिष्टत्वेन च भ-
गवत उपादानं अस्मिन्नाटके तदंशभूतस्य जगद्रक्षणार्थ मवतीर्णस्य रामस्यनेतृत्वं तच्च
रितस्य जगद्रक्षण निमित्तस्य धनुर्व्यापार माद्य रावणादि वधस्या धिकारिक वृत्तस्य च
दर्शयति. एवं प्रत्यूह निवारण सामाजिका वर्जनफल माशीर्वादं विधाय भारती
वृत्यंगभूताऽऽमुखप्रस्तावाय परिक्रमण नैपथ्यशाला वलोकन पूर्वकनटी माकारयति
आर्ये इत्यादिना.

भारती संस्कृतप्रायो वाग्व्यापारो नराश्रयः भेदैः प्ररोचना युक्तै र्वीथी प्रहस-
नामुखैः इति भारती लक्षणं आमुखश्चैवं लक्षितं सूत्रधारो नटीं ब्रूते मारिषंवा विदूष
क स्स्वकार्यं प्रस्तुताक्षेपि चित्रोक्तया यत्तदामुखं प्रस्तावनावेति आर्ये इति नटीं सूत्र

सूत्र—आर्ये !

> अभिरञ्जिनी जनानाम् सहायसाध्या ङ्गुरूपदेशेन ।
> धुर मुद्वहामि गुर्वीम् नृप इव भरतादिभिर्वोढाम् ॥२॥

भूतो: परस्पराह्वानमार्य शब्देन कर्त्तव्यं भगवन्तो धीरैर्वाच्या विद्वद्देवर्षिलिंगिन: विप्रामात्या प्रजाश्चार्या नटी सूत्रभृतौ मिथ: इति अत्रार्य शब्देन श्रेष्ठ्यवाचिना नाट्यप्रयोगोचित विशिष्टगुण संपन्नत्व मपितस्यालक्ष्यते इतस्ताव दागम्यता मिति शेषन्तावच्छब्देन प्राथम्यवाचिना प्रथममागम्यता मनन्तर म्महाकार्यान्तर मध्यस्तीति सूचितं ततश्चत च्छ्रवणौ त्सुक्येन तस्या आगमन संभ्रमो दर्शित: अत एव प्रविश्येत्युक्तं यत्र संभ्रमादि चित्तविकार मवलंब्य पात्रप्रवेश: तत्र ल्यबन्तेन प्रवेशक्रिया मुक्त्वा हेत्युत्तरक्रिया पदाध्याहारेण वचनशेषतया प्रवेशनस्य निर्देश: आर्य इयमस्मीति आगतेति सिध्यति अत्र प्रत्यक्ष सिद्धस्यागमनस्य निवेदनेन तच्छ्रवणौत्सुक्य मवगम्यते. एवन्तदौत्सुक्य दर्शनेन प्रसन्नो भूत्वा चिकीर्षितं कर्म्मनिवेदयति. आर्ये नाट्यप्रयोग सहकारिषु प्रधानभूते. अतस्त्वां विना कस्मै अन्यस्मै एत न्निवेदयामि इति भाव: इदानीङ्काञ्चिद्धुर मुद्वहामि अवश्य कर्त्तव्यत्वेन अध्यवस्यामि किंरूपामिति विशेषजिज्ञासायामाह भरतादिभि र्वोढामिति. अनेनाद्य प्रयोगात्मिका न्धुरमित्युक्तं भवति. भरत मुनिर्हि विरिञ्चप्रणीत न्नाट्यवेद मभ्यस्य तत्प्रयोगं कृत्वा तद्विषयनिबन्धन ञ्चकार यथोक्तं उद्धृत्योद्धृत्य सारं य मखिलनिगमा न्नाट्यवेदं विरिञ्च श्चक्रे तस्य प्रयोग म्मुनि रपि भरत इति भरतादिभि रित्यनेनार्वाचीनानां नाट्यप्रयोगस्य तदुपज्ञत्व न्दर्शयति भरतमुनिना यथा प्रयोगप्रकारो निर्व्यूढ: तथा प्रयोक्तु मध्यवसाय इत्यपि दर्शितं आदिशब्देन संप्रदायप्रवर्त्तकानां आचार्याणा ङ्ग्रहणं वोढा मित्यस्यैकपदत्व साधुत्वं श्चिन्त्यं पृथक्पदत्वे वाशब्दस्य विशेषणसमुच्चयार्थत्वेन कथञ्चि दुपयोग: गुर्वी मिति भरतोक्तप्रयोगप्रकारसंपादनेन नायकेतिवृत्तरसादिमाहिम्नाऽनोपत्कारप्रयोगा मेवंविधगुरुतरनाट्यप्रयोगं कर्त्तु कथ मध्यवस्यतीत्यत आह गुरूपदेशेनेति बाल्यात्प्रभृति परिचरणादिभि: प्रसादिताना म्महातीर्थानां शिक्षापूर्वकेणोपदेशेन उपदिष्टस्य पुन: पुन रभ्यासेन च इत्यर्थ: यथोक्त कैशोरात प्रभृति प्रसादितमहातीर्थस्य शिक्षाबला दभ्यासाच्च जितश्रमेण विदुषायेन प्रयोगश्रिया विद्याया निजया स्वतो गुणवता माधुर्य माधीयते गांभीर्य ञ्च परं स एव विदुषां सम्यक् प्रसूते रसान् इति अत्र मदाह्वानं किमर्थ मित्यपेक्षायामाह सहायसाध्या मिति अनेन चैकनायकप्रयोज्यभाणादिव्यवच्छेद: कृत:

नटी —

१. अज्जस्स गुरुअं दाव अहिआरं आआरो एव्व सूएदि.

१. आर्यस्य गुरुक स्ताव दधिकार माकार एव सूचयति.

यथोक्तं भाण स्तु धूर्तचरितं स्वानुभूतं परेण वा यत्रोपवर्णयेद् देको निपुणः पण्डितो विटः इति सहाये स्तत्तत्पात्रोचितपाठगीतिगतिरसप्रयोगादिनिपुणै स्सह संयतो निसर्गतो नाटकप्रयोगस्य सहायसाध्यत्वं अत एव त्वदाह्वानं कृतं एव मतिप्रयत्नसाध्याया धुरः किंप्रयोजन मित्यत आह अभिरञ्जनीञ्जनानामिति नहि कस्य चि दन्यस्य कर्म्मण एवं सर्वजनानुरागफलत्व मस्ति जनानुराग श्च सर्वसंपत्कारणं यथोक्तं जनानुराग प्रभवा हि संपद इति अतो जन्मान्तरार्जितसुकृतपरीपाकैर्नैवेयं विद्या लभ्यते यथोक्तं अपि लभ्येत विद्वद्भि र्मुक्ति रभ्यासकौशलात् न तु नाटकविधेयं सर्वलोकानुरञ्जनी अतो धर्म्मत्वात् परमप्रयोजनत्वाच्चास्या न्धुरि महा नादरः कार्य इत्यर्थः नृप इवेति यथाऽद्यतनो राजा पूर्वराजन्यै र्भरतादिभि रूढां धुर मुद्वहति तथेत्यर्थः नानाविधानुग्राह्यनियम्यजनानुरूपानुग्रहनियमनादिव्यापारस्य परमोत्साहसाध्यत्वात् गुर्वी अत्रा प्यर्थशास्त्रादिगोचरो गुरूपदेश उद्यमने हेतुः अमात्यादिसहायसापेक्षत्वं जनानुरागफलत्व ञ्चाऽत्रापि विद्यत एव अत्रा र्थश्लेषस्योपमाङ्गत्वं उक्त ञ्चार्थश्लेषस्य लक्षणं श्लेष स्स वाक्यत एव कस्मि न्यत्रानेकार्थता भवे दिति अत्र श्लेषेण नृपनटधुरयो स्साधर्म्यैवगत एव एकरूपव्यापारोद्वहनात्मक न्नटस्य नृपसादृश्य प्रतीयत इति श्लेषस्य तदङ्गत्वं "प्रविश्य रङ्ग न्निष्क्रामे त्सूत्रधार स्सहानुगः स्थापकः प्रविशेत्तत्र सूत्रधारसमाकृतिः दिव्यमर्त्ये स तद्रूपो मिश्र मन्यतर स्तयोः सूचये द्वस्तुबीजं वा मुखंपात्र मथा पि वा" इत्युक्तलक्षणानुसारेण वस्तुसूचन मपि कृतम् रामो ह्यगस्त्यादीना ङ्गुरूणा मुपदेशेन सर्वराक्षसवधात्मका म्महोत्साहसाध्यसेतुबन्धादिगर्भत्वेन गुर्वी सहायभूतसुग्रीवादिभि स्सह साध्या ञ्जगद्रक्षणफलत्वेन सर्वरसाभिरञ्जिनी न्धुरं कर्तु मध्यवसाय मकार्षी दिति. गुरुशब्देन मातापितृविवक्षायां गुरूपदेशेन सहित इति योज्यम् एव मुक्तविशेषणविशिष्टाया धुरो रूपकान्तरगोचरत्वेना पर्यवसाना न्नाटकैकविषयत्व मवधार्य तद्विशेषजिज्ञासया तदुक्त गौरवातिशय मुक्तिसंवादभूतेनानुभावेना लक्ष्या नुपदिशति आर्यस्येति अधिक्रियत इति कर्मव्युत्पत्या अधिकारो नाट्यप्रयोगः तस्य गौरवं दृष्टे स्तत्फल

सूत्र—

अथकिं सुन्दरि ! ननु बहूना मसाधारणो दुर्गमः पन्थाः

नटी—

१. अउअ किं असाहारणं त्ति पुच्छदि.

---

१. आर्य कि मसाधारण मिति पृछ्यते.

मथ्यस्वर्धारत्वादि राकार एव तावत् प्रथमं वचनात् पूर्व मेव सूचयाति न त्वत्र वचनापेक्षा यत आकारेण वचना दपि स्फुटतर मवगम्यते अतो धिकारगौरव म वक्तव्य मेव अधिकार गुरुत्वहेतु स्तु वचनसापेक्ष इति वाक्यपर्यवसानं आर्यस्याकार एवेत्यन्वयः एव न्तदुक्तिसूचितजिज्ञास्यत्वं गौरवहेतुं विवक्ष न्नुक्त मेवाऽर्थ मनुमन्यते अथकि मिति असाधारणः पन्था दुर्गमो ननु इत्यन्वयः अत्र बहूना मिति षष्ठ्या नलोकाव्ययेति प्रतिषेधेऽपि दुस्त्यजं किन्धृतात्मना मित्यादि शिष्टप्रयोगानुसारेण साधुत्वं पथिशब्दो ह्यभिमतदेशान्तरप्राप्तिसाधने संस्कृते देशविशेषे मुख्यया वृत्या प्रसिद्धः तत्राऽभिमतसाधनत्वसामग्रयो गुणः तं लक्षयित्वा तत्गुणयोगिषु विद्याविशेषेषु गौण्या वृत्या वर्त्तते अत्र प्रकरणेनाऽस्य नाटके च पर्यवस्याति विद्यान्तरेष्वप्यस्य प्रयोगो दृष्टः यथा ऋजुकुटिलनानापथजुषा न्नृणा मेको गम्य स्त्व मसि पयसा मर्णव इव " इति गौणीप्रवृत्तिः पूर्वै रेवं लक्षिता "अभिधेयं विना भूतप्रतीति र्लक्षणोच्यते लक्ष्यमाणगुणै र्योगा द्वृत्ते रिष्टा तु गौणता " इति प्रकृष्टतरगांभीर्यौदार्यप्रौढतादिवचनगुणशालितया प्रतिपाद्येतिवृत्तादिगौरवेणा साधारणो लोकोत्कृष्टो यो नाटकविशेषः स बहूना न्दुर्गमः दुष्करप्रयोग एव ननु रत्नार्यै कस्यचि त्तु पुण्यशालिनोऽभ्यासाद्यतिशयेना तिप्रयत्नसाध्यप्रयोगोऽयं भवे दपि अत एवं भूतनाटकगोचरत्वेन ममा धिकारस्य गुरुत्वं युक्त मेवेत्यर्थः अथवा दुर्गमो यः पन्था स्स बहूना मसाधारण स्साधारणो न भवति " अश्राद्धभोजीब्राह्मण " इतिवत् प्रसज्यप्रतिषेधे नञ् गाभीर्यादिगुणयोगा द्दुष्करप्रयोगो यो नाटकविशेष स्सो न्यै रप्रयुक्तपूर्वत्वा दस्माभिः प्रयोक्ष्यमाण स्स मस्मान् प्रत्यसाधारणो भवति अतो स्यातिप्रयत्नसाध्यत्वा दधिकारस्य गुरुत्वमिति भावः इह ननुबहूना मित्यारभ्य प्रज्ञाविलसितमित्यन्तेन भारतीवृत्त्यङ्गभूता प्ररोचना क्रियते यथोक्तं "उन्मुखीकरणं यत्र प्रशंसातः

सूत्र— आर्ये ! दक्षिणापथा दागत माश्चर्यचूडामणि न्नाम नाटक मभि नयाम्रेडितसौभाग्य मभिलषाम इत्यार्यमिश्राणां शासनम्

नटी—

१. अज्ज ! अच्चाहिदं खु एदं आआसं पसवइ पुप्फं सिअदाओ तेल्लं उप्पादअंति जइ दक्खिणाओ दिसाओ आअदं णाडअणिबन्धणम्.

---

१. आर्य ! अत्याहितं खल्वेतत् आकाशं प्रसूते पुष्पं सिकताः तैल मुत्पादयन्ति यदि दक्षिणस्या दिश आगत न्नाटकनिबन्धनम्

प्ररोचना " इति कविकाव्यप्रयोक्त्रादीनां सम्मुखापादनं प्ररोचना इत्यर्थः एव मसाधारणशब्देन को विशेषो विवक्षित इत्यर्थः पुरातनानि नाटकानि प्रायेणा स्माभि रन्यै श्च प्रयुक्तपूर्वाणी ति तेषा मसाधारणत्व न्न घटते अद्यतन न्नाटक न्तादृश ञ्च मया ना श्रावि इत्यसाधारणशब्देन यो विशेषो भिप्रेतः स उच्यता मित्यर्थः अथ त मेव विशेषं आर्यामिश्रशासनरूपेण वचनेन स्फुटयमान माचष्ट आर्ये इत्यादिना तव प्रयोगनैपुण्य मनुरूपप्रयोज्यलाभा त्सफलीकरिष्यामीति संबोधनाभिप्रायः दक्षिणापथा दिति अतिदू रदेशोद्भूत मिम न्देश प्राप्त न्न न त्वत्रत्येन केनचि न्निर्मित मत्रैव वर्त्तमान मित्यर्थः अनेन नाटकस्य गुणवत्तमत्वं लोकपरिग्रहानुवृत्त्या दर्शित न्नाटक मागत मिति न तु केनचि द्देशान्तर एवंभूतं नाटक मस्तीति लोकवार्त्ताश्रवणेन त न्देश ङ्गत्वा नीतं कि न्तु तत्तद्देशेषु तत्तदभियुक्तपरिग्रहेण नाटकं स्वय मत्राऽऽगत मिति चेतनवन्नाटकस्याऽ वगमनसौकर्यं दर्शितं तु आगमनकर्तृत्वाभिदेशः वीरकार्याद्भुतरसभूयिष्ठत्वेनाश्चर्यं चूडा मणि रित्याश्चर्यचूडामणि रिति संज्ञा आश्चर्यभूतचूडामणि र्यस्मिन् प्रतिपाद्यत्वेनाऽङ्कीकृत इति वा नाटक मिति प्रकरणादीनां रूपकान्तराणां प्रकृतिभूतं इतिहासपुराणादिप्रसिद्धे तिवृत्तमहितं बीजबिन्दुपताकाप्रकरीकार्यलक्षणार्थप्रकृतिपञ्चकोपेतं प्रारंभयत्नप्राप्त्याशा नियमाप्तिफलागमावस्थापञ्चकसमन्वित मुखप्रतिमुखगर्भविमर्शनिर्वहणसंज्ञसन्धिपञ्चक तदङ्गचतुष्षष्टिसहितं वीररसानुचितेतिवृत्तसूचकविष्कम्भप्रवेशक चूलिकाङ्कास्याङ्कावतराख्या र्थोपक्षेपकपञ्चकविशिष्ट म्महासत्वतादिगुणविशिष्टधीरोदात्ताद्यन्यतरनायकशीलार्जवादिगु णविशिष्टस्वीयाकन्यका न्यतरनायिकं पीठमर्दविटविदूषकादिसहायोपबृंहितनायकव्यापारं वि दर्भपाञ्चाल लाटगौडाख्यदेशभेदोद्भूतरीतिचतुष्टयसंपन्नं भारतीसात्वतीकैशिक्यारभ

सूत्र—आर्ये! मामैवं अपचिनु गुण मपहस्तय जन्माभिनिवेशं

(पश्य) गुणाः प्रमाण न्न दिशां विभागो निदर्शन न्नन्विद मेव तत्र.

स्तनद्वये ते हरिचन्दन श्च हार श्च नीहारमरीचिगौरः ॥३॥

१. **नटी**—(आत्मानं विलोक्य) जुज्जइ.

---

१. युज्यते.

टीसंज्ञकवृत्तिचतुष्टयोपशोभितं आवन्त्याभीरस्त्यादाक्षिणात्यामागधीनामेवंचतुर्विधप्रवृ
त्तिचातुर्यार्पितं विभावानुभावव्यभिचारिसात्विकोपबृंहितरत्युत्साहस्यात्मकवीरशृंगारा
न्यतराङ्गिरसंशुद्धैकानेकानुबन्धिधर्मार्थकामफलं यद्रूपकं तन्नाटक मित्युच्यते आश्चर्यचूडाम
णिर्नाम नाटक मस्तीति शेषः तदभिनयाभिनिविष्टा.नागय मभिनयाम इति तच्छन्दोव्या
हार्यः अभिनये वाचिकाङ्गिकाहार्यसात्विके रतिशयितं सौभाग्यं यस्येति विग्रहः आम्रे
डितशब्देनाऽयंपर्यालोचनास्वादः पूर्व मेव संवृत्त इति दर्शितं इदानीं प्रयोगदर्शन मा
भिलषाम इत्युक्तम् महता न्नियोज्यं प्रति निजाभिलाष निवेदन मभिलषितनियोगपर
मेव भवति इति शासन मित्युक्त एव मुक्तस्य नाटकविशेषस्य प्रविरलविद्वज्जनदाक्षिण
पथापादनेनाऽविश्वसनीयत्वा दप्रयोग मन्यमाना सापहास माह आहितं स्थितं त द-
तिक्रम्य वर्त्तत इत्यत्याहितम् असंबद्धमित्यर्थः आकाशं पुष्पं प्रसूते सिकताः तैल मुत्
पादयन्ति तर्हीति सिद्ध्यति यदि दक्षिणस्या दिश आगत न्नाटकनिबन्धन मित्युक्तं य-
दि तत आगत न्नाटकनिबन्धनं तर्हीद वृत्तान्तान्तरं आकाशादिभ्यः पुष्पादिजनन
मेव तत्तुल्य मित्यर्थः निदर्शनाऽत्राऽलङ्कारः यथोक्त न्निदर्शना "अतद्वस्तुसम्बन्ध उपमा
परिकल्पनः" अत्राऽसंभव न्नेवाऽऽकाशादिपुष्पादयो र्जन्यजनकभाव उक्त स्स न्नुपमायां
पर्यवस्यति अथ तस्य दोषाभासादि निवेशा न्निरस्य न्नाह आर्ये मामैव मवोच इति शे
षः अत्राऽपचिनुमित्यनेन गुणादानस्य पुष्पापचयसाम्य न्द्योतितं जन्मभूमिमुद्दिश्य यो-
भिनिवेशः दोषग्रहणेनिर्बन्ध स्त मपहाय परित्यज्य इत्यर्थः उभयत्राऽपि सदृष्टान्तं हेतु
माह **पश्येत्यादिना** गुणा एवोपदा प्रमाणं कारणं हाने दोषा एव कारण मित्यर्था त्सिद्ध्य
ति उभयत्राऽपि न दिग्विभावः कारणं इद मेवेति नन्वस्मात् कारणात् सन्निहितात्
प्रत्यक्षात् संप्रतिपन्न श्चसाधीयो न्य न्निदर्शनान्तर मस्ति अथात्मगतहारहरिचन्दनावलो
कनपूर्वकं सबहुमान न्तदुक्ति मेव संवदति युज्यते रत्नाकरः खलु स देश इति अथैवं

१. रअणाअरो खु सो पदेसो.

२. अउअ कदमो उण सो कवी जो अत्तणो पञ्ञारूवं णिवन्धणव्वा जेण देसन्तरं पवेसिदुकामो

सूत्र—आर्ये, श्रूयतां, उन्मादवासवदत्ताप्रभृतीनां काव्यानां कर्तु श्शक्तिभद्र स्येदं प्रज्ञाविलसितं.

१. रत्नाकरः खलु सः प्रदेशः

२. आर्य कतमः पुन स्स कवी य आत्मनः प्रज्ञारूपं निबन्धनव्याजे न देशान्तरं प्रवेशितुकामः.

भूत नाटककरणसमर्थं कविबहुमन्यमानं तन्नामधेयादिकं परिपृच्छति **आर्य इत्यादिना** यआत्मनः प्रज्ञानं यद्रूपं निबन्धनव्याजेन प्रेषितुकामः निबन्धननिर्म्माणारंभसमये संवृत्त इति वाक्यसमाप्तिः कवयोहि स्वबुद्धिव्यापारवैचित्र्य न्देशान्तरे कालान्तरे च प्रकाशयि तुं काव्यमारभन्ते यथोक्तं "दिव मप्युपयाताना माकल्पमनल्पगुणा येषां रमयन्ति जगान्ति गिरः कथ मिव कवयो न ते वन्द्याः" इति आधारेण पुरुषेण विनाऽऽधेयस्य प्रज्ञान रूपस्य देशान्तरप्राप्तेः प्रतीयमानत्वा दाद्यो विशेषोऽत्राऽलङ्कारः यथोक्तम् "विना प्रसि द्ध माधार माधेयस्य व्यवस्थितिः ऐकात्म्या युगप द्वृत्ति रेकस्याऽनेकगोचरा अन्यत् प्र कुर्वतः कार्य मशक्यस्या न्यवस्तुनः तथैव करण ञ्चेति विशेष स्त्रिविध स्स्मृतः अत्र कार्यभूतवास्तवनिवन्धनानिषेधपूर्वक न्तत्कारणभूतप्रज्ञारूपस्य समारोप स्तस्मि न्नादर्शग तप्रतिबिंबवत् स्फुटतर मवगम्यमानत्वा दिति ज्ञेयं नापह्नुति रलंकारो त्र संभवति उप मानोपमेयभावाभावात् एवं हि प्रकृतं य न्निषिध्याऽन्य त्साध्यते सात्वपह्नुति रित्यस्य व्याख्यान उक्तं उपमेय ममत्यं कृत्वा पमानं सत्यतया य त्स्थाप्यते सापह्नुति रिति अल विस्तरेण एवं भूतः कविः पुन स्स कतम स्तच्छन्देन कवे रवश्याभ्युपगम्यत्व न्द र्शयति अथ सबहुमान मुत्तर न्ददाति आर्ये उचितवादिनि विवाक्षितवचनावकाश स्समुचित एवा यं प्रश्नः श्रूयतां श्राव्य एवा य धन्यो महाकविः. **शक्ति भद्रस्येति** शक्त्या कवित्वनिदानभूतसंस्कारे ण भद्र इत्यर्थानुगत मेव न मम प्रज्ञाविलसित मिति पूर्ववत् तत्कार्यत्वेन निबन्धनस्य तत्वारोपः उन्मा दवासवदत्ताप्रभृतीनां काव्यानां कर्त्तु रिति पूर्व मेव बहुप्रबन्धकर्त्तृत्वेन प्रसिद्ध न्न केवल मिदानी मेव निबन्धननिबन्धृत्वेनैव अनेना भ्यासात् पूर्वप्रबन्धेभ्यो स्य

नटी—१. होदव्वम्.

सूत्र—तत स्त्व मपि पात्रावधानं कुरुष्व अह मप्येव मार्यमिश्रा न्विज्ञापया मि-अये किं न्नु खलु मयि विज्ञापनव्यग्रे शब्द इव श्रूयते (नेपथ्ये ज्याघोषः क्रियते).

सूत्र—अङ्ग पश्यामि भवतु विज्ञातम्

सपत्नीकस्य रामस्य वर्त्तय न्वन्य मास्पदं।
ज्यानिर्घोषेण सौमित्रि पक्वसत्वा नपोहति ॥

निष्क्रान्तौ प्रस्तावना

—:o:—

१. भवितव्यम्.

विशेषो दर्शितः यतो ह मेवं भूतमहाकविकृतनाटकप्रयोगगोचरा न्धुर मुद्वहामि अत स्त्व मप्यात्मोचितं पात्रं प्रत्यवधान न्नेदकपरत्वं कुरुष्व एव मित्यनेन प्रयोगसामग्रीप्र कारलाभ उक्तः एवं प्ररोचना ङ्कृत्वा प्रयोगातिशयेनाऽद्य पात्रप्रवेशं सूचयतु मुपक्रमते **अये किन्नु खल्वित्यादिना** एषो य मित्युपक्षेपात् सूत्रधारप्रयोगतः पात्रप्रवेशो यत्रैष प्रयोगातिशयो मतः अये इत्यचिन्तितोपनतपदार्थोपलम्भसंभव मावग सूचयति विज्ञापनार्थं व्यग्रे प्रयोगकालातिपातभया त्संभ्रमेण प्रवर्त्तमाने सति शब्द इव श्रूयते इ व शब्दो विशेषानवधारणद्योतनार्थं किन्नु **खल्विति** शब्दविशेष न्वन्देन् [illegible] **अङ्ग पश्यामीति** अवहितो भूत्वा विचार्य निश्चिनोमि [illegible] ज्याघोषं श्रुत्वा निश्चित्याऽऽह भवतु विज्ञात भवतुशब्दो मानर्नोन [illegible] य इति सौमित्रि ज्याघोषेण पक्वान् परिणतान् जायते ऽस्ति वर्द्धते परिणमः अपक्षीय म्रियत इत्यासां षण्णां अवस्थाना म्मध्ये तुरीयां विपरिणामावस्थां प्राप्ता निरूढयौवन त्वेनाऽति दृप्ता नित्यर्थः सत्वान् सिंहव्याघ्रादीन् अपोहति निरस्यति [illegible]मित्यत्राऽऽ ह सपत्नीकस्य रामस्य वन्य मास्पदं निवासयोग्यां पर्णशाला न्निवर्त्तय न्निति हेतौ प्रवि शता पर्णशालायं दुष्टसत्वनिरासं करोतीत्यर्थः अनेन केवल मङ्कायपात्रप्रवेश एव न सूचि तः सपत्नीकस्य रामस्य प्रवेशो पि सूचितः अत्राऽऽमुखस्य कथोद्घातप्रवर्त्तकप्रयोगा तिशयसंज्ञकानि त्रीणि असाधारणान्यङ्गानि उपोद्घात्याङ्कावलिङ्गितादीनि त्रयो दश वी

ततः प्रविशति धनुर्बाणपाणि लक्ष्मणः.

लक्ष्म—

ज्याघोषेण निराकरोमि भयदान् पर्यन्तभाजो मृगान्
पर्णैस्सद्म समापयामि शयनं बद्ध्नामि पुष्पच्छदैः

थ्यंगानि साधारणानी ति षोडशाग मामुखं सर्वेषा मंगाना मेकत्र न नियमः तेषा म
न्यतमेनाऽर्यं पात्रं वा क्षिप्य सूत्रभृत्प्रस्तावनान्ते निर्गच्छे त्ततो वस्तु प्रपञ्चये दित्युक्त
त्वा दत्र प्रयोगातिशयेनैव पात्रप्रवेश स्सूचितः यथा शाकुन्तले "एष राजे व दुष्यन्त
स्सारङ्गेणा तिरंहसा " इति एवं प्रारब्धत्वात् प्रयोगस्य तदारंभविज्ञापनं निरर्थक ममन्य
मान स्त दकृत्वै वानन्तरोचितपात्रभूमिकापरिग्रहार्थं नटीसहित स्सूत्रधारो नेपथ्यशाला
मुद्दिश्य निष्क्रान्त. स्थापनेत्यामुखपर्याय· अथा त्रा "द्वौ विष्कंभक ङ्कुर्या दङ्क वा
कार्ययुक्तः अपेक्षितं परित्यज्य नीरस वस्तुविस्तरं यदा सन्दर्शये च्छेष ङ्कुर्या द्वि
ष्कंभक स्तदा यदा तु सरस वस्तु मूला देव प्रवर्तते आदा वेव तदाऽङ्कास्या दामुखाक्षे
पसंश्रयः " इति विष्कंभकस्य पाक्षिकत्वाभिधानात् आमुखान्तन नियमः इत्यामुखाक्षिप्त
स्याऽङ्केन प्रस्तावः कृतः अङ्क श्चैवं लक्षितः यथा प्रत्यक्षनेतृचरितोबिन्दुव्याप्तिपुरस्कृ
त अङ्को नानाप्रकारार्थ संविधानरसाश्रय इति अत्र धीरोदात्तस्य रामस्य सर्वकार्येषु
माहात्म्यं प्रतिपादयमानो लक्ष्मणो पि धीरोदात्त एव न धीरोद्धत स्तल्लक्षणाना न्दर्पमात्स
र्यादीना मननुगते र्महासत्वतादीना मनुगतं श्च धीरोदात्तगुणां श्च तत्र तत्र योजयिष्या
मः अथ लक्ष्मणो यौवनोदये ऽपि भ्रातृगोचरभक्त्यतिशयेन महासत्वतया च कामान्
भव मुत्सृज्य निरुद्धाभिषेकस्य वनं गतस्य रामस्य पदवीं च्छायेवा नुगम्य तत्तदृषीणा
माश्रमेषु निवसत स्तस्य दशवर्षाण्यप्रत्यूहेन परिचर्यां विधाय राक्षसपीडितमुनिजनप्रार्थ
नया निखिलराक्षसवधं प्रतिज्ञाय तद्वैरसघटनार्थं गोदावरीतीरं प्राप्तस्य भ्रातुः पर्णशाला
निर्माणार्थं नियोग मवलंब्य सिंहव्याघ्रादिदुष्टसत्वसमाकीर्ण न्तद्देश मवलोक्य बद्धसन्ना
हः तन्निराकरणोपायं पर्णशालानिर्माणप्रकार ञ्च मनसा निर्द्धारयति **ज्याघोषेणेत्या
दिना** ज्याघोषेण मृगान् सिंहव्याघ्रादी न्निराकरोमि दूरीकरोमि यथा पुनः प्रत्यागम
नवाञ्छा न भवेत्तथा तिकटुना ज्याशब्देन दूर न्नयामी त्यर्थः अनंगीकृतराज्यपरिपा
लनतया नियमितया च निग्रहस्या नौचित्या च निराकरोमीत्युक्तं कुतः पुनर्निराकरण म
त आह भयदा निति आत्मनि तेषां भयजनकता भावेऽपि सामान्येन भयदा नित्युक्तं

वेत्राणा मुपपादयामि वलयै रायामिनां विष्टरम्
सिञ्चामि क्षिति मार्द्रपङ्कजरजोविद्धै रपां रेणुभिः ॥ ५ ॥

अत आर्याया आर्यदर्शनार्थ मागताना श्चाऽत्र स्थिता स्सन्तो भय न्दास्यन्ति अतः पूर्व मेव निराकरोमीत्यर्थः ननु भयदा अपि ते यत्र न सन्निदधते तत्र पर्णशाला क्रियता मत आह भयदान् इति पर्यन्तभाजः आत्माश्रयदेशापेक्षया पर्यन्तशब्दः पर्यन्ताना त्मदेशव्यतिरिक्तान् सर्वदिगुपाधिकान् देशविशेषान् भजन्ती ति पर्यन्तभाजः, गोदावरीतीरप्रदेशान् सर्वा नेत्र सन्निहितजलत्वेन प्रच्छायशीतलत्वेन निवासगृहीकृत्य पुत्रकलत्रादिभि स्सह स्वैर मासीना न्न तु यदृच्छया गता नित्यर्थः अनेन निराकरणस्याऽवश्यकत्व न्दर्शितं अत्र विशेषणद्वय समुच्चित्यैव निराकरणहेतुत्व मप्रत्येकं मत्र दूरस्थानां भयदानां सन्निहिताना मभयदाना ञ्च निराकरणेन तात्पर्ये पर्णशालायाः पर्णभूयिष्ठत्वा त्तन्निर्माणे तेषां प्रधानकारणत्वात् पर्णै रित्युक्तं एत च्च साधनान्तराणा मुपलक्षणम् समापयामी ति समापननिर्द्धारणं करणप्रकारनिर्द्धारण मप्याक्षिपति अकृतस्य समापनायोगात् वेत्राणां वलयैः वलयीकृतै र्वेत्रै रिति वलयीकरणनिर्द्धारणप्रकारः विष्टर मिति प्रतिनाम सामान्येशेषं उपपादयामि उत्पादयामी त्यर्थः आयामिना मित्यनेन विष्टरस्य सन्धानकृतपारुष्याभाव न्दर्शयति शयनीयस्य पर्णादिसाधनान्तरासंभवेऽपि मार्दवातिशय मामोद ञ्चाऽऽपादयितु पुष्पच्छदै रिति पुष्पदलपरिग्रहः आर्द्रै र्निसर्गतो मद्ध्वार्द्रैः पङ्कजरजोभि रार्द्राणा न्नूतनाना न्तत्कालविकसितानां पङ्कजानां रजोभि र्विद्धै स्संवृत्तै रपां रेणुभिः क्षितिं सिञ्चामि सेचनेन संस्करोमि अत्रेति वृत्तबीजभूतो भयदरक्षोनिराकरणोत्साहः कविना लक्ष्मणमुखेन सूचितः इति शेषं **तथा कृत्वेति** मृगनिराकरणप्रभृतीनां वास्तुबलिपर्यन्तानां कर्मणा मनुष्ठानप्रकारो यथा निर्द्धारितः तथे त्यर्थः कृत्वा विलोकय आहित्यर्था त्सिध्योत **कथञ्चि** **दित्य**परिचयानिमित्तः क्लेशो दर्शितः न तु यथावदनुष्ठानाभाव एवेति दृश्यमानप्रकारानिर्देशः **शासन मनुष्ठित मिति** यद्यपि शासनस्य नियोगरूपवाक्यात्मकत्वा दनुष्ठेयत्व न्न संभवति तथा पि तद्गोचरकर्मानुष्ठानेन विना शासनस्या र्थवत्त्वाभावात् तदनुष्ठानवशं शासनानुष्ठान मित्युपचर्यते इत्यदोषा त्सर्वत्र हि प्रवृत्तिविषयस्य कर्मणः इष्टप्राप्तहेतुत्व मनिष्टपरिहारहेतुत्वं वा वगम्यैव प्रवृत्ति र्दृष्टा इह तु त दवगमम् विना प्रवृत्तिविषयस्य कर्मण श्शासनविषयत्वबुद्ध्यैव प्रवृत्ति रिति दर्शयितु मेव मुक्तं अत एवाऽऽह "आज्ञा गुरूणा मविचारणीया इति एव मात्मनोऽपरिचितकर्मानुष्ठानसामर्थ्यं विपिनवास

तथा कृत्वा—कथञ्चिद् देव मनुष्ठित मार्यशासनं—अहो नु खलु विपन्नाना मवस्था मेधाविनी.

याव दिमां पर्णशालां परिसमाप्ता स्तावत् गोदावर्या स्तटैकदेशे तरंग मारुतै र्दूरपरिश्रम मपनयन्त मार्य मार्यया सार्द्धं विज्ञापयामि

(परिक्रम्याऽवलोक्य)—अये ! अरण्यविरुद्धेऽय माकृतिः—इहहि.

•र्दर्शनपरिकल्पित म्मन्यमान स्तन्माहात्म्यं प्रति विस्मय मवलम्बमानः तटस्थवृत्त्या निरू पयति अहोनुखल्विति अवस्था वृत्ति म्मेधाविनी मेधयाऽतिशायिन्या बुद्धिवृत्त्या युक्ता "अस्माका मेषा सैवो चिते" रित्यतिशायेन विनिप्रत्ययः अत्र विपन्नत्व मेव हेतु रिति निश्चीयते अविपन्नाना मेवंभूतबुद्धित्वस्यादर्शनात् पुरुषधर्म्मस्यापि मेधातिशय स्याऽवस्थायां समारोपः तत्फलस्य तत्र दर्शना दिति ज्ञेयं पूर्वं मृष्याश्रमेषु दशवर्षाणि निवसत स्तस्य मुनिजनानुभावाश्रमाभोगदर्शनसहायलाभादिभिः राज्यभ्रंश वनवासा दिषु नात्यन्त विपद् बुद्धिर्जाता इदानीं विजनं वनं प्राप्तस्य तत्राऽऽर्ययो र्निवासभवनमा लोचयत सहसैव विपद्बुद्धि र्जाता एत च भाविनो मारीचविषयस्य सम्भ्रमस्य द्वारतां प्र तिपद्यते अत्र कविना विपन्नाना मित्यनेन सीतावियोगात्मिका विपत् सूचिता. मेधा विनीत्यनेन सुग्रीवसख्य सेतुबन्धाद्युपाय दर्शन सामर्थ्यं च सूचितं. एवं पर्णशा लां कृत्वा तन्निवेदन मद्यावसरयति यावदिति याव त्तावत् दार्थे प्रति पर्णशालां प रिसमाप्ता विज्ञापयामी त्यन्वयः आर्यया सार्द्धं न्तरङ्गमारुतै र्दूरपरिश्रम मपनयन्त मित्यनेन रामे सीतया सहैव दूरागमनायासेन सहायान्तराभावा च तद्भवननिर्माणेन खेदो व्य ज्यते तेन च तत्क्षणागमनत्वरा सूचिता अय मेव खेद स्तद्दर्शनसमये प्रकटीभवि ष्यति. अत एव वक्ष्यति कष्ट विधिः करोति अथ परिक्रम्य सहसा रामाभिमुख मा यान्तीं ललितसुकुमाररूपां शूर्पणखां दृष्ट्वा ह अये इति अतर्कितदर्शनसम्भ्रम मार्येण सूचयति इय मलोकसौन्दर्यादिगुणविशिष्टत्वेन दृश्यमाना आकृति राकारविशेषः आकारस्ये वारण्यविरुद्धत्वा दाकृतिरित्युक्तं अरण्यविरुद्धा योग्येति यावत् अस्या जन्मनो निवासस्य वा अरण्यं न भवत इत्यर्थः एतन्तद्दर्शनसमये किञ्चि द्रसभावनाबुद्धिर्जाता तदैव तद्रूप वैचित्र्यदर्शनजनितेन विस्मयेन मायाप्रभावजनितेन किञ्चि दौत्सुक्येन च स्तम्भितप्रसरोऽभूत् कृत इत्यरण्यानौचित्यापेक्षा दर्शिता. अस्याश्चर्यरूपस्य किं नु वसुधाऽऽकारः किं न्वे वा मिति किंशब्दस्य नुशब्दाभ्यां सम्बन्धः अत्र पाठक्रमा दर्थक्रमो बलीया निति न्यायेन पाठक्रमो न विवक्षितः पाठक्रमाश्रयणे प्रथमं स्वर्गाङ्गनात्वेन निरूपितस्य पुन र्भू

अस्या ऽतिमात्रायतलोचनस्य रक्तभ्रुणः कृशपयोधरस्य ।
आश्चर्यरत्नस्य विलासयोनेः किं साकरो धौ र्नु वसुन्धरा नु ॥
(चित्तविकारं निरूप्य) किं मिदं नन्वहं रामानुजो लक्ष्मणः.

व्याकरन: परिग्रहेणापकर्षो भवेत् इत एवोत्तरश्लोके सनाथांकुर्वाणा धरणि मिति प्रथम धरण्याकारत्वं वक्ष्यते वसुन्धराशब्दो वसुन्धरैकदेशभूतविशिष्टजनपदविवक्षया प्रयुक्तं इतरथाऽरण्यदेशस्या पि तदेकदेशत्वेन सन्देहकोट्यनुप्रवेशसंभवात् आकरशब्दो हि धनधान्यादीना मुद्भवस्थाने देशे प्रसिद्धः अत्र हि रत्नोत्पत्तिस्थानदेशस्य जिज्ञास्यमानत्वा दाकर इत्युक्तम् औत्सुक्यजनितोऽयमाकरवितर्कः अस्याऽश्चर्यरत्नस्येति साहश्यनिबन्धना साध्यवसानिका लक्षणाश्रयितस्याप्रस्तुतस्य सौरूपस्य निर्गायाश्चर्यरत्नत्वेन व्यवसितत्वात् यथोक्तम् विषयन्तः कृते न्यस्मिन् सा स्यात् साध्यवसानिका इति आश्चर्यशब्दोऽत्रा गृ प्रीति मितिवत् कार्यकारणसंबन्धहेतुकया सारोपया लक्षणया धर्मिपरत्वं वर्तते अतो रत्नशब्दसामानाधिकरण्य मुपपन्नम् यथोक्त सारोपान्या तु यत्रोक्ता विषयी विषय स्तथा इति सौरूपस्य रत्नात्मकत्वप्रतीत्या वैशिष्ट्य सारोपफलं अत्राश्चर्यमपरिस्तावगात रत्नफलं अस्याऽतिमात्रायतलोचनस्येत्यादिभि र्विशेषणै रत्नस्यावयवसौष्ठवातिशयो दर्शितः अथ तात्कालिका न्विशेषा नाह विलासयोने रिति प्रियतमदर्शनकाले नेत्रादिव्यापाराणां विशेषेण लसनं यत् स विलासः यथाह तात्कालिको विशेष स्तु विलासोऽङ्गक्रियादिषु इति एतच्च शारीरात्मकस्य ललितस्य भावहावादीनां चित्तविकाराणामप्युपलक्षणम् यथाह सुकुमारोऽस्य विन्यासो मसृणोल्लीलनं भवे दिति निर्विकारात्मकात् सत्वा दभादस्तत्राऽद्यविक्रिया हेवाकत्वं स्य शृङ्गारो हावोऽक्षिभ्रूविलासकृ दित्यादि यतो स्य सौरूपस्य सहनीयदेशाकरत्वं अतोऽत्राश्चर्यमिति हेतुत्वेन न व्याक्यपर्यवसानम् एवं लक्ष्मणमात्र तन्मायाप्रभावकृतरूपवैचित्र्यदर्शनजनितविस्मयेनौत्सुक्याक्षिप्तचित्तो भूत्वा तदेवा त्मस्मृति मवलंब्य त्मीयवितर्कविकारं निरूप्या ह किं मिद मिति अनेनात्मनि सञ्जातस्य चापलस्य स्वयमेव कृतो निरासः अथवा चापलस्या त्मन्ययोगत्वे हेतु माह नन्वहं रामानुजो लक्ष्मण इति लक्ष्मणशब्दो त्र तन्मात्रे प्रयोजनाभावा त्स्वार्थ मभिधाय तत्सहचारि नयधैर्यादिगुणसम्पन्नत्व मवगमयति लक्ष्मणशब्देन धैर्यादिगुणाना मवगम इति तेषां लक्ष्मणस्वरूपान्तर्भावप्रतीतिः फलं भवति न स्वशब्दे रभिधाने तदन्तर्भावप्रतीतिः रहित एव दुक्तम् भवति नैसर्गिकविनयधैर्यादिगुणयोगित्वेन प्रसिद्धं य न्मम लक्ष्मणत्वं तस्या त्यन्त मयोग्य मिदं मच्चापल मिति

सनाथीकुर्वाणा धरणि मथवा धाम मरुताम्
भवे देषा कामं विरमतु वितर्कः स्खलधियाम् ।

एवं रामानुजशब्दो [illegible] ह्यार्य मभिधाय तन्मात्रे प्रयोजनाभावा त्तत्समर्वते ज्ञायःपार
तन्त्र्य गमयति. य दिदं बाल्यात् प्रभृति नियमेन तत्पारतन्त्र्य मत् सर्वलोकप्रसि ; रामा
नुजत्वं तस्याप्येत दत्यन्त मनुचित मित्यर्थः [illegible]शब्देनाभिप्रेत मर्थ विवृणोति स
नाथीकुर्वाणेति [illegible] एषा आत्मना धरणीं सनाथां कुर्वाणा काम भवत् अथ
वा मरुता न्धाम स्वर्ग काम मित्यनेनान्यद्वा देशान्तर मित्यनास्या दर्शिता ना स्माकं
महिमन्विषये मार्गदृष्ट्यादिवत् स्वलो [illegible] पर्यवसानं अतो
य माकरवितर्को विरमतु अनेना करवितर्केणा [illegible] मित्यर्थः नह्युपेक्षागोचरे वस्तुनि
परीक्षायाः किञ्चित् प्रयोजन मिति भावः न केवल प्रयोजनाभावा देव अयं वित
र्को नाश्रीयते कि [illegible] च इत्याह वितर्कः स्खल[illegible] वितर्कशब्दस्य
पूर्वोत्तराभ्यां सह संबन्धः यत एव [illegible] वितर्कः स्खलधियां भवति अतो **स्मा**
भ्राप्यनुवर्तमानोऽयं वितर्कः स्खलधीत्व मापादयति न त्वस्मा त्रानुवर्तते विनयधैर्यादिगु
णशालित्वेन [illegible] दिति तेभ्यो व्यतिरेको र्थात् गम्यते रामानुजशब्देना
भिप्रेत मर्थं विवृणोति च्छ्वः **कर्तुमिति** अहं कथं **स्मरपरवश** स्स्यां न केनापि
हेतुना **स्मरपरवश**[illegible] अत्र हेतुः भ्रातुर्वशे तिष्ठ मिति न तु भ्रात्रा नि
र्बन्धेन **स्ववश** प्रापितः स्वय मेव वश प्राप्तः य अहं स्वय मेव बाल्यात् प्रभृति
भ्रातृपरिचर्या परमधर्म ञ्जानान एतावन्त काल तद्वशे तिष्ठामि स एवेदानीं कथं स्म
रपरवशो भवेयं अव्यवस्थितचित्तत्वं हि तदा स्या [illegible] इदानी मार्यस्या तस्यापि
शेषे [illegible] त्यन्त मनुचित मेवेद मित्याह वच इति यदि राज्यस्यस्या नुष्ठितगुरु
वियोगस्य वा वशवर्तिन स्स्यां तदा नात्यन्त दोषाय भवेत् सम्प्रति पुन गुरुनियोग
मनुष्ठातुं [illegible] मनुभवतो धर्मानुष्ठानसाहाय्य मवलंब्य वर्तमानोऽहं [illegible]
वश स्स्या [illegible] मिद मत्यासम्येत्यनेनोक्तं. [illegible] कर्तु मित्यनेन आर्य[illegible]
गुर्वनुगमनस्य महिमानं जानात: कथ मेवंभूत स्स्या मित्ययमर्थो व्यज्यते. पुनरपि हेत्व
न्तरमाह वशिन इति जितेन्द्रियस्य वशे वर्तमानः कथ मजितेन्द्रिय स्स्या [illegible]
[illegible] दर्शनात्म[illegible] विनिना कुलीकृता दति गुरुपरिचर्याव्यवसाया [illegible]
यकगुणो दर्शितः यथा ह "व्यवसाया दचलनं धै[illegible] [illegible]कुला दर्पा" ति अत्र
पूर्वार्द्धगतयाऽनादरोक्त्या निरीक्षणस्य निन्दागर्भत्वं व्यज्यते एव निन्दागर्भ मीक्षिताया

वचः कर्त्तुं पित्रोर्वन मिद मवाप्तस्य वशिनो
वशे तिष्ठन् भ्रातु स्स्मरपरवश स्स्या ङ्कथ महम् ॥

ततः प्रविशति ललितसुकुमारवेषा शूर्प्पणखा

शूर्प्पणखा—

१. (लक्ष्मण न्निरूप्य) हं अअं पि सो एव्व. (व्रीळा न्नाटयति)

---

१. हं अय मपि स एव.

अपि तस्या अनिवर्त्तनेन पुन स्तान्निवर्त्तनार्थं परुषतरवीक्षण मपि योग्यतया लभ्य त एवेति तदाविकृत मित्यवसेयं अथ नाटकप्रतिपाद्यस्य नायकप्रतिनायकेतिवृत्तस्य बीज भूतं शूर्पणखावृत्तान्तं लक्ष्मणमुखेन सूचितोपक्रम प्रतिपादयति इह खलु शूर्पणखा राव णनिहतभर्तृका तन्नियोगेन लोकोत्तर पुरुषं पतित्वेन परिगृहीतु मित स्तत स्सञ्चरन्ती जनस्थान मासाद्य गोदावरीतीरगतं रघुवीरं दृष्ट्वा मदनाकुलहृदयाऽऽत्मनो रूप न्तद्रूपगु णाननुरूपम्मन्यमाना मायाबलेन ललितसुकुमारवेषा भूत्वा त मुपगम्य ततोऽलब्धमनो रथा तेन लक्ष्मणाभिगमनव्याजेन प्रत्याख्याता ततोपसर्प्पण मनिच्छन्त्यपि तन्नियोगकर ण तत्प्रसादहेतुं मन्यमाना ततो निर्गत्य मार्गे गच्छन्त्येवात्माभिमुख मायान्तं सौमित्रि न्दृष्ट्वा विस्मयौत्सुक्यविवशा रामसादृश्येन त मवगम्य तद्रूपातिशयं विभावयति हु **मि त्यादिना** हु मित्यविचारितरूपातिशयप्रभवहर्षसमुत्थो हावोऽनुभाव: सर्वेषा मेव सौ न्दर्यसौकुमार्यादीनां तथाभूतत्वेन दृश्यमानत्वा त्स एवेति तत्वारोप: आरोपफल ञ्च सर्वथैवाऽभेदप्रतीतिः अपिशब्दो गुणाश्रयसमुच्चयार्थः तद्दर्शनसमये पूर्व न्तदेकाश्रयत्वे न ये निरूपिता गुणा स्तेषां सर्वेषा मपि अस्मि न्विद्यमानत्वा दय मपि स एवेतिसमु च्चयोपपत्तिः अयोगव्यवच्छेदार्थं एवशब्दः नहि तादृशः कश्चि दसाधारणो गुणोऽस्मि ञ्जागर्त्ति येन भेदप्रत्ययसापेक्षं तत्सदृशोऽय मिति सादृश्य न्न रामो यमिति अरामत्वं वाऽव गम्येत अनेन पृथक्त्व मात्र मेव भेदहेतुः नप्रतीतिभेद इति व्यज्यते पूर्वं रामसमीपा दागच्छ न्त्या स्तदानुकूल्यालाभं लक्ष्मणस्य तादृग्गुणत्व ञ्च निरूप्याऽऽत्मान मधन्य म्मन्यमाना या महा न्निर्वेदो जातः पुन स्तादृशगुणस्याऽस्य दर्शने सञ्जातस्यानन्दस्य स एव निर्वेदः पोषहे तुस्संवृत्तः इति ज्ञेयं एव न्तद्दर्शनानन्तर मुत्तमाङ्गनासमुचितव्रीळासाध्वसादिभि स्तत्पुर तो वर्त्तमानाऽऽत्मानं पश्यत स्तस्य किञ्चि त्सञ्जात ञ्चित्तविकार मनुभावमुखेना लक्ष्य कृतार्था पुनस्तत्क्षणा देव तस्य सावज्ञं परुषतरंदृष्टिपात मवलोक्याऽऽत्मानुरागा

लक्ष्म — प्रतिकूल मिद माचरितम्.—यदेषा.

आचारा ननुचरता तपोधनानां
सावज्ञं परुषतरं मयेक्षिताऽपि
सव्रीला वदन मधःकरोति कम्पा
दुत्तंसप्रगलितषट्पदेन मूर्द्धना

परिज्ञाना त्तस्यानुरागभङ्ग माशंक्य विशेषतो व्रीळादिभि रात्मानुरागं स्फुटतरं प्रकाश्य तत्पुरतो तिष्ठन्ती **व्रीळान्नाटयतीत्यनेन** व्रीलादीना माधिक्य मेवोक्तम् इतरथा विलासयोने रित्यनेन सानङ्गपरुषदृष्टिपाता त्पूर्वं मुदितस्य विलासयोगस्या सम्भव प्रस ज्येत अथ सौमित्रि स्स्वव्यापारविरुद्धं निशाचरीव्यापार मिरीक्ष्य निरूपयति **प्रतिकूल मिदमाचरितम्** आचरणं भावे निष्ठा प्रतिकूल मस्मद्व्यापारस्या त्यन्तविरुद्ध कथं विरोध इत्यत आह यदतः एषा इदानी मरण्यमध्ये सहसा [illegible] अवि [illegible]निकुलना मधेयादिका तपोधनाना माचारा ननुचरता मया सावज्ञं परुषतर मीक्षिता पि सव्रीला कपा द्धेतो रुत्तंसेभ्य शिरोलंकारभूतेभ्यः प्रगलिताः प्रच्युताः पूर्वं परिमळादिलोलुप तया वसियता षट्पदा यस्मि न्नत्र कंपाति येना नुभावेन साद्ध्वसातिशयो गम्यते ते न मूर्द्धना सह वर्त्तमाना वदन मधः करोति अत्राधोमुखत्वेना नुभावेन व्रीलातिशयो गम्यते यथोक्तं दुराचारादि व्रीळाधार्ष्ट्याभाव रु। मुन्नयेत् साचीकृतांगावरणवं[illegible]णधा धोमुखादिभि रिति व्रीळासाध्वसातिशयेना नुरागातिशयः प्रकाश्यते तयोस्तत्कार्यत्वा[illegible] तपोधनाना मिति परमप्रेमास्पदत्वगुणयोगं तपसि धनशब्दोपचार सर्वस्यैव हि धनं परप्रेमास्पदं भवति तपस्विनां तु तप एव परप्रेमास्पदं अत स्तेषां धनं त देव अनेन अर्थकळत्रादिविषयाभिलाषो निरस्तः तेन तदाचारानुविधायिनो पि तद भावः प्रकाश्यते आचारान् यमनियमादीन् तदंगभूतान् त्रिषवणस्नानादीन् च अनु चरता तद्व दनुष्ठित इत्यनेन तपश्चरणचिह्नभूतजटावल्कलादिधारणं पश्यन्त्या अस्या मदान्[illegible]कामनं मत्पुरतोऽवस्थानं वा अनुचितं तत्रा पि कमनीयवेषा[illegible] [illegible]मरभण मिवेवंभूत म्मा मवलोकयन्त्या य दिदं व्रीळादिभि रात्मानुराग प्रकाशनं त दत्यन्तविरुद्ध मिति द्योतितं तत्राऽप्येवं विलसन्ती निन्दारमे मीक्षिताऽऽमकान्तेन सादर प्रेक्ष्यमाणेव पूर्वस्मा दधिकतरं य द्व्रीळादिभि रात्मानुरागा[illegible]शयप्रकाशनं करोति म[illegible]न्त मिवे न्धं द्योतयति पुन र्निवर्त्तयितुं परुषं परुषतर म्व वीक्षिता निजप्रेयसा प्रणयातिशयधर्मे

(१) शूर्पं--(आत्मगतं) . किण्णु खु अअं पि भणिस्सिदि होदु एत्तिअं दाव कहइस्सं (प्रकाशं) अज्ज ! इदो दाव.

लक्ष्म—न समाधि स्त्रीषु लोकज्ञः (तूष्णीं गच्छति)

२. शूर्पं— (किंचि दनुगम्य) . अज्ज!असदिसं विअ अज्जस्स सरणागदस्स उवक्खणं इत्थिआजणस्स

---

१. कि न्नु खल्वय मपि भणिष्यति भवतु एताव त्तावत् कथयिष्ये; आर्य! इत स्तावत्

२. आर्य ! असदृश मिव आर्यस्य शरणागतस्य उपेक्षणं स्त्रीजनस्य.

विलोकयमानेव य दात्मानं तत्तद्विलासास्पदं करोति तदत्यन्तं दैन्य मापादयति यथा यथा क्रमेण मया वैराग्यातिशयः प्रकाश्यते तथा तथैषा रागातिशयं विभावयति तत्त देतत् क्वचि दपि न दृष्टपूर्वं अथ निशाचरी एवं विलासविशेषैः प्रयतमना व्युत्पन्न त्वस्तस्याऽनुरागस्याऽनुदयं सावज्ञदृष्टिपाताद्यनुभावै रनुमाय चिन्तयति **किन्नु ख लु अय मपि भणिष्यतीति** रामेण यथोक्तम् तथैव वाउताऽन्यथैवेत्यर्थः एवं निरूप्य जयत्वार्य इत्येवं समुदाचारं कर्तु मुपक्रममाणा प्रयाणोन्मुख न्त न्दृष्ट्वा आभिमु ख्यसम्पादनप्रकारं मनसा निर्द्धारयति **भवत्विति** भवतुशब्दो मानसनिश्चय माह तावत् प्रथमं एतावन्मात्रं कथयिष्यामि यावता वचनेनाऽऽभिमुख्यं लभ्येत पश्चा दाभिमुख्ये संजातेऽभिलषितं निवेदयामि इति भावः आर्य इतस्ताव दागम्यता मिति शेषः किं वाङ्मात्रेणाप्येवंभूतं जन मनभिनन्द्य जिगमिषास इति भावः एव न्त स्या श्चेष्टाविशेषै र्वचनविशेषेण चा त्मचित्तविलोभनार्थं दुरध्यवसाय मवगम्य अनया सह संभाषण मपि प्रसक्तानुप्रसक्तया सानुबन्धं सत् प्रस्तुतकार्यस्य नियमस्य च भङ्ग मापादयेत् इति निश्चित्य पुन र्लोकवृत्तानुरोधाऽप्यस्या मवस्थायां प्रतिवचन म दातव्य मित्यध्यवस्यति **न समाधि स्त्रीषु लोकज्ञ इति** लोको लोकवृत्त मागतं प्रति स्वागतवचनादि समाधि स्तं न जानाति यद्यपि समाधियुक्तपुरुषनिष्ठ एव तद्धेतुको लोकवृत्तज्ञानाभावः तथाऽपि समाधे रव्यभिचारेण तद्धेतुत्व न्दर्शयितु तदा रोपो युज्यते यदि समाधिः तर्हि लोकज्ञत्व मपि नास्त्येव तत किं तदभावस्य पुन रनिष्टत्वकथनेन इति भावः अत्र समाधिशब्देन समाध्यवस्थायोग्यत्व मेवोच्यते

न तत्काले समाधियोग: इतरथा आत्मानं न परं वेत्ति योगी युक्त स्समाधिना इति न्याये न स्वपरविभागज्ञानाभाव: प्रसज्येत अत एव स्त्रीष्विति लोकवृत्तज्ञानाभावस्य विषय नियम: कुत: एत दुक्तं भवति तपस्विनां स्त्रीविषयं लोकवृत्तज्ञानं नास्तीति प्रतिव चनदानाभावेन न कश्चि द्दोष इति समाधि र्नामोपासकस्य यमनियमाद्यंगसमुदायसाध्य उपास्यनिष्ठ श्चित्तलय उच्यते यथोक्तं यमनियमासनपवनायामाप्रत्याहृति स्सहैव धारण या ध्यान ञ्चाऽपि समाधि: प्रोक्तान्यंगानि योगयोग्यानि सत्य महिंसा समता धृति रस्तयं क्षमार्जव ञ्च तथा वैराग्य मिति यम स्स्यात् स्वाध्यायतपोऽर्चनाव्रतानि तथा सन्तोष श्च स शौचो नियमस्यादान ञ्च पञ्चविध: पद्मस्वस्तिकवज्रकभद्रकवीराह्वया: क्रमा त् दपि रेचकपूरककुंभकभेदा त्रिविध: प्रभञ्जनायाम: मुञ्चे द्दक्षिणया निल मथा नये द्वामया च मध्यगतया संस्थापये च नाड्येति एवं प्रोक्तानि रेचकादीनि षोडश तद्विगुणं चतुष्षष्टिकमात्राणि तानि च क्रमश: चित्तात्मैकवृतस्य प्राणस्य स्थानसंहृति स्स्थानात् प्रत्याहारो ज्ञेय: चैतन्ययुतस्य सम्यगनिलस्य स्थानस्थापनकर्मप्रोक्ता स्या द्धारणेति तत्वज्ञै: यो मनसि देवताया भाव स्स्या दस्य मन्त्रिण स्सम्यक् संस्थापये च तत्रेत्येवं धन्या वदन्ति तत्वविद: सत्तामात्रं नित्यं शुद्ध मपि निरञ्जन ञ्च यत् प्रोक्तं प्रविचिन्त्य च य त्तस्मिन् चित्तलय: स्यात् समाधि रुद्दिष्ट: इति अथ निशाच री तूष्णीं गच्छन्त न्तं सामप्रयोगासाध्यं मन्यमाना अदृष्टशङ्काजनकेन भेदेन प्रयत्न स्सर्वथा कार्यो मतिमद्भि: मनीषिते यावत् पक्षानुपेक्ष्यत्वा दभि:प्रेतस्य वस्तुन: इति न्यायेन स्वाभिमतं साधयितुं अध्यवस्यन्ती किञ्चि दनुगम्य अभि:प्राय माह **आर्य इत्यादिना** शरणागतस्य स्त्रीजनस्य उपेक्षण मार्यस्याऽसदृश मिव न कदाचित् अपि शरणागतोपेक्षणं सदृशं विशेषतो राज्ञां तत्राऽपि भवद्वंश्यानां ततो पि धर्मनिष्ठस्य भ वत इत्यभिप्राय: किं पुन रनाथस्त्रीजन मिति भाव: असदृश मेवेति निश्चये सत्यपि असदृश मिवेत्युक्तं तच्चित्तानुवर्त्तनार्थ ञ्च केना पि हेतुना स्वदुपेक्षणं सदृश मिति प्रतिभाति उपेक्ष्यामहे च भवता वयं अतो भवद्बहुमानात् असदृश मिवेत्येव वक्तुं शक्नु म इत्यभि: प्रायो व्यज्यते अत्र व्यसनविशेष मनुक्त्वै व शरणागतस्येत्युक्ति रेवंभूतं तस्या दुरभिप्रायं सूचयति यदि साक्षा देनं स्मरसन्तापरूपं व्यसन न्निवेदयामि ततो विरक्तस्यास्यात्यन्त मुपेक्षैव भवेत् अत श्शरणागतस्येत्येताव दभिहितं तेन सूचितं व्यसनविशेष मसौ स्वय मेव पृच्छति क स्ते व्यसनविशेष इति अनेनैव मुक्ता यदि मदी यं व्यसन मपाकर्त्तुं समर्थोऽसि तर्हि वक्ष्यामीत्युक्ते पुन रसामर्थ्यप्रसंगभावात् प्रतिज्ञा स्यति सर्वथा ते व्यसन मपाकरिष्यामीति त दविळंब मुच्यतां इत्युक्ते सत्यनंगतापरूप मिदं मद्व्यसनं निवेदयिष्यामीति तत स्सत्यवचनसंरक्षणपरत्वात् आनिच्छ मपि मां परि

लक्ष्म—न हि नहि मयोपेक्ष्यते भवती साम्प्रत मवस्थान्तरशोचनी यस्य गुरो रलङ्घनीयेन शासनेन खलु.

१. **शूर्प**—जइ एव्वं इमं पि जणं अन्तरेण आणा गुरुअणस्स ण खु दाव उवक्खणं अरुहदि.

लक्ष्म—(रोषं) आः क स्ताव न्मा माज्ञापयति.

१. यद्येवं इम मपि जन मन्तरेण आज्ञा गुरुजनस्य न खलु ताव दुपेक्षणम् अर्हति.

गृहीष्यतीति एवं तस्या आत्मनोपेक्ष्यमाणाया अप्यनुगच्छन्त्या व्यवहारविशेषेण दुरभिः प्रायं विज्ञाय व्यसनविशेष मपृष्ट्वैव तदुपपादित मुपेक्षणस्याऽसदृशत्वं निषेधति **नहि नहीति** द्विर्वचनेनाऽसदृशत्वं शङ्कित मपि न शक्य मिति दर्शयति न हि नहीति अ नेनैवाऽर्था दुक्त मुपेक्षणस्य योग्यत्वं हेतुनोपपादयितुं प्रतिजानाति भवती मयोपेक्ष्यते य त्तत् साम्प्रतं युक्त मेवेत्यर्थः कुत इत्यत आह **अवस्थयेति** गुरो श्शासनेन हेतौ तृतीया इह विषयविशेषानुक्त्या गुरुशासनं शासनत्वेनैवानुष्ठेयं न त्वत्र विषयविशेषा पेक्षेति दर्शयति ननु शरणागतरक्षण मपि तद्व देव कर्त्तव्यं अत आह **अलंघनीयेनेति** नहि कर्त्तव्यान्तरमपेक्ष्य गुरुशासन म्न लंघनीय मिति द्योतयितुं ननु याव दनु ष्ठितगुरुनियोगः कृतकृत्यता मुपैति तावत् प्रतिपालयामि अत आह **अवस्थान्तर शोचनीयस्येति** वनवासात्मकेनाऽवस्थाविशेषेण शोचनीयस्येति अनेन यदैव एता वदवस्थान्तर मत्येष्यति ताव न्मम तत्परिचरण मेक मेव धर्म इति दर्शितं अथ तद्वच नेनैव तस्य गुरुनियोगाधीनत्व मवधार्य कृतार्था निशाचरी निजाभिलषितगोचरं गुरुशासन न्निवेदयितु मुपाक्रमते **यद्येवमिति** यदि गुरुशासनस्य सर्वथाऽलंघनीयत्वं तर्हि शर णागत मिमं जन मन्तरेणाऽधिकृत्य भवन्तं प्रति या गुरुजनस्याज्ञा साऽपि नोपेक्षण मर्हति तच्छब्दोऽवधारणार्थः तेनाऽपि हेतुनोपेक्षण मार्हत्येव शरणागतत्वेन गुर्वनुज्ञया च अयं जनोऽनुगृहीतव्य एवेति भावः अथ पूर्व मेव तस्या निर्बन्धातिशयेन सञ्जा तनिर्वेद स्सौमित्रिः पुन स्तदभिमतसम्पादनगोचरं गुरुनियोग माकर्ण्य कुपितः प्राह **आ इति** कोपे आ स्तु स्यात् कोपपीडयो रिति को गुरुजनभ्रातृपरिचरणार्थ मेवं वनं प्राप्तं मा मन्यस्मिन् अनुचिते कर्मणि आज्ञापयति हितोपदेशित्वाभावा त्तस्य गुरुत्व मेव नास्तीति भावः क स्ताव दिति नित्य मेवाऽऽर्यसमीपे वर्त्तमानस्याऽनवसितं तदा ज्ञानुष्ठानस्याऽन्यमुखेना र्यकर्त्तकं मय्ये कार्यान्तराधिज्ञापन मप्रसंगात् बुध्द्यवसितं

सव्याख्याने मानवेदचम्पुकाव्ये

प्रथमस्तबकः

लक्ष्मी मातनुतात्स वो मुनिवरो व्यासाभिधानोऽनिशं

यः प्रालेयगिरा ववान्तरतमोरूपेण नित्यन्तपः

हरिः श्रीगणपतयेनमः अविघ्नमस्तु. अशोकनिलयावासि तेजो मूर्त्तित्रयात्मकं सच्चिदानन्द मद्वैत ञ्चित्तसीमनि भावये १. स्थलीश्वरो सदा भद्रविक्रमो भक्तारिष्टदो निर्विघ्न न्त स्तद्देशस्थ ।वर्ष्मनिशं च समाश्रये २. वाणी मन्दस्मुत ञ्चाऽपि वन्दे शितिघनच्छविं. कमलासनवैवश्यविश्रामचणौजसं ३. शिष्टाध्यमारीचनिरासकर्म विज्ञातविस्मापनगोप्रकाण्डः रामो गुरु में हृरिलेवक स्ता त्सलक्ष्मणः साधुपदोपदेष्टा ४. चंपुभारतसूक्ष्मार्थदर्पणं बालतर्पणं टिप्पणं रामशिष्यो हि कृष्णो विलिखति क्रमात् ५ इह खलु कविः चंपुभारतस्य पूर्वभागतया अनुक्रमेण सोमवंश्यानां पुरूरवः प्रभृतीनां राज्ञा ञ्चरितवर्णनरूपं क मपि प्रबन्ध मारभमाणो मंगलारंभयुक्तानां विनिपातो न विद्यत इत्युक्तत्वा द्विघ्नविघाताय द्वादशभिः पद्यै स्स्वाभीष्टदेवता स्सादर मनुसन्दधाति लक्ष्मीत्यादि व्यासाभिधान स्स मुनिवरः अनिशं वः लक्ष्मी मातनुतात् इतिक्रियाकारकसंबन्धः आतनुतात् कुरुतात् तनु विस्तार इत्यस्मा ल्लोटि तुह्यो स्तातङि ति तातङ् अनेकार्थत्वा द्धातूना मत्र तनोतेः करण मर्थः, तथाच पुरुषकारे धातुपाठे तु क्रियावाचित्वप्रदर्शनपरो ऽर्थनिर्देशः नतु नियमार्थः तथाच कुर्द खुर्द गुद क्रीडाया मेवे त्येवकारः पठित इति कल्पटोक्तिनिर्वाहा दवसीयते यथाप्रयोगम् क्वाचि दर्पाठते प्यर्थे धातवो भवन्ती ति यावत् इति अवान्तरतमा नाम मुनि र्भूत्वा अवगत मा[illegible] स्तमो यस्य त्यवान्तरतमाः प्रालेयगिरौ हिमवति नित्य न्तप स्तन्वानस्य हरे र्भगवतो विष्णोः अविकला पूर्णा कला अंशः लोकोपकारे विषये उद्यता तदेव प्रतिपादयति प्रागित्यादिना द्वादशे स्तबके वक्ष्यति च यो लोका नित्यादि विश्वै स्सात्वतपुङ्गवै रित्यादिच प्रागित्यनेन वेदविभजनानन्तर माचीन्तितोपनतां तदर्थानां व्याकीर्णता मालोच्य अर्थरूपेणा ऽपि क्रमास्तित्वाविति मनसि कृत्य भगवा न्व्यास स्तल्लक्षण मेव महाभारताख्य मितिहास मकृतवा निति तद्व्याख्योपक्रन्यीयते. अस्यन्दत. प्रस्नुता. स्यन्दू प्रस्रवणे अनुदात्तः. अस्मा

65901

तन्वानस्य कला हरे रतिकला लोकोपकारोद्यता
द्राग् स्यन्दत भारतामृतझरी यस्ये च मास्येन्दुतः ॥ १ ॥
नृत्यन्तं रजनीमुखे स्व पितरं स्तुत्यं त्रिलोकीजने
नित्य न्त निजकर्णतालपवनै रत्यन्तमानन्दयन्

झरी भारत मेवा ऽमृतझरीति मयूरव्यंसकादय इवेति समासः. अत्राऽऽदौ नाऽऽय याशक्तिवाचकस्य लक्ष्मीशब्दस्य प्रयोगो मङ्गलार्थः. भूदेवताकस्य सर्वगुरो र्मगण स्य प्रयोग इव. तदुक्तं शुभदो मो भूमिमय इति. किञ्च करेरङ्गभूतस्य व्यासस्ये ष्ट देवतात्वेनोक्ति रग्रे[illegible]णां आत्मन इच्छा ऽतितरां मङ्गलाय सर्वदा सर्वकार्येषु ना स्ति तेषा ममङ्गलं येषां हृदि स्थितो विष्णु र्मङ्गलायतनं हरि रित्युक्तत्वात् अत्र व्या सविषयो रतिलक्षणो भावः हरेः कलेत्यनेन व्यासस्य मुन्यन्तरेभ्यो व्यतिरेकः भारत स्याऽमृतझरीत्वारोपेण एतदास्वादनतत्पराणां नराणां जन्मजरामरणादिरूपस्य संसार स्याऽत्यन्तो परमस्स्या दिति वस्तु च प्राधान्येन व्यज्यते वर्णावृत्ति रनुप्रासः पादेषु च पदेषु च पूर्वानुभवसंस्कारबोधिनी यद्यदूरता इति सरस्वतीकण्ठाभरणेऽनुप्रासस्य सामान्यलक्षण मुक्तम् अत्र कला कला स्यन्दत आस्येन्दुत इति द्वयो र्व्यञ्जनसमुदाय योः परस्पर मेकधा सादृश्यं छेकानुप्रासः यथोक्त मलङ्कारसर्वस्वकृता स्वरूपस्यानेय मे पूर्वे छेकानुप्रासः द्वयो र्व्यञ्जनसमुदाययोः परस्पर मनेकधा सादृश्यं [illegible]नियमः. यस्येय मास्यन्दुत इति केवलव्यञ्जनसादृश्येन वृत्त्यनुप्रासः अन्यथा तु वृत्त्यनुप्रासः केवलव्यञ्जनसादृश्य मनेकधा समुदायसादृश्य न्यायादीनां च परस्परसादृश्य मन्यथाभा वः अनयो रेकाभिधानानुप्रवेशलक्षण स्सङ्करः अत्राऽऽस्यस्येन्दुत्वनिबन्धनं केवलं परंप रितरूपकम् अभेदप्राधान्य आरोपविषयानपह्नवे रूपकम्. आरोपोऽन्यत्राऽन्यारोपः अ त्राऽऽस्यस्येन्दुत्वारोपहेतु र्भारतस्याऽमृतझरीत्वारोपः. एवं रूपकपरंपरायुक्तत्वात् परं परितरूपं. आस्यस्यैकधार मेव रूपितत्वात् केवलत्वं च अत्र शार्दूलविक्रीडितं वृत्त सूर्याश्वै र्मसजस्तताः सगुरवः शार्दूलविक्रीडितं १

नृत्यन्तमित्यादि:—नृत्यन्तं नर्तनं कुर्वन्तं नृती गात्रविक्षेपे शतृ परस्मैभा षः नित्यं शाश्वत मिति पितु र्विशेषणं वा स्तुत्यं एतत्स्तुशासु इति क्यप् ह्रस्वस्य पितीति तुक् च त्रयाणां लोकानां समाहार स्त्रिलोकी तद्धितार्थेति समासः संख्यापूर्वो द्विगु रिति द्विगुत्वं द्विगो रिति ङीप् अकारान्तोत्तरपदो द्विगु स्त्रियां भाष्यत इति द्विगोः कलापस्य चायः पुष्पादेनैकत्र मेलने समाहारः कर्णतालपवनैः कर्णाघातपवनैः यद्वा शासन. कर्णः

आघ्नान् अथ यथालयं भुवि करामेणोऽरुणार्द

कृपानिघ्नात्मा स हि विघ्नराज इह मे विघ्ना न्विजेघ्नीयताम् ॥ २ ॥

विद्यादानविशारदा विनमतां बालेन्दुराजज्जटा

जूटाग्रारदनीरदावलिरुचीनीलारदा शारदा

कर्णताल: "नवतमालनिभस्य नभस्तरो रचिररोचिष रोचत वारिदै:" रित्यत्र वल्कमा कृष्णया शोभनं नभो नभस्तरिति प्रशंसावचने थे ति समासः अन्यार्थो ना मपि शब्दानां प्रशंसार्थता दृश्यते यथा कर्णतालः केशहस्ती मुनिशार्दूल इत्या दौ ताडादीनीति आघ्नानः आहननं कुर्वन् आङो यमहनस्वात्मनेपदं अत्र अकर्मकादिति वर्तते तेन भुवीत्युक्तः यथालयं लय मनतिक्रम्य अव्ययं विभक्ती त्यादिना पदार्थानतिवृत्ता वव्ययीभावः विलम्बितादि लयं इति नामसूत्रं "गीत वाद्य नृत्या नामेकिरातालयो म साम्ये ला" इति टीकाकारः अस्य उकारात् मिति क्रियाविशेषणं क्रियाविशेषणानां च नपुं सकलिङ्गता द्वितीयैकवचनान्तता च वक्तव्या करगा निज अधीनः अधीनो निघ्न आ यत्त इत्यमरः इह प्रारीप्सिते प्रबन्धे विघ्ना न्विजेघ्नीयतां पुनः पुनः निश्शेषतया विह न्तु विघ्नानां पुनः पुन हन्तीति संभवात् हननस्य पौनःपुन्योपपत्तिः विपूर्वाद्धन हिंसाग त्यो रित्यस्मा द्धातो रेकाचो हलादे रिति यङ्. हन्ते र्हिंसायां यङि घ्नीभावो वक्त व्य इति घ्नीभावः सन्यङो रिति द्विर्वचनं हलादि शेषः कुहो श्चु रिति चुत्वं अ भ्यासे चर्चे ति जश्त्वं गुणो यङ्लुको रित्यभ्यासस्य गुणः लोट् लकारः पौनः पुन्यं भृशा र्थो वा क्रियासमभिहारः "धनं हुताशना दिच्छे द्वल मिच्छे तथाऽनिलात् आरोग्यं भास्करा दिच्छे दाधिपत्यं प्रजापतेः मोक्षं जनार्दना दिच्छे त्सम्यक्ज्ञानं महेश्वरात् स र्वारंभेष्वविघ्नेन कार्यसिद्धिं गणेश्वरात्" इति बोधेत्पत्तिप्रकरणे. अत्र तत्कल्याभ्या मनयो रप्युत्सवक्रमावस्य युक्तता गम्यते. २

विद्येत्यादिः—जटाजूटः जटाबन्धः शारदः शरदि भवः कालात् ठञिति ठञ् आ द्धे नियामतत्वा दन्यत्राऽप्येव इयी इति बह्वादित्वाद्यो ङीष् तत्र हि पठ्यते कुदि कारा दक्तिनो वा ङी ष्वक्तव्यः सर्वतो क्तिन्नर्थो दित्येक इति कृदिकारा दक्तिकारा द पि ङीकारः. परिभवः घाञि उपसर्गस्य घञिति दीर्घः त भ्द्रहाती ति भावो गुणसर्वे क र्तेत कः शीर्षभावरत्या प्रज्ञातीव शरीराणि तानि मनसोऽपि शोधयंतीति वा तत्वज्ञानक पेय सम्भवतीति शारदा सरस्वती कन्दमानमयी शब्दब्रह्मस्वरूपिणी भवत् तद्रूप इ ति वचना न्मवद् वैखरी मटी वत्तु शीघ्रं मेधुपातु पौनःपुन्येना स्वयं तृप्यतु भुव सो

शब्दब्रह्ममयी विरिंचवदनांभोजन्मरंगस्थली
शैलूषी लत्नु मो मुषीतु शमलं मे शेमुषी मीयुषी ॥ ३ ॥

केलीलोल मुदारनादमुरलीनालीनिलीनाधरं
धूलीधूमलकान्त कुन्तलभरव्यासंगिपिञ्छाञ्चलं ।
नालीकायतलोचनं नवघनश्यामं क्वणत्किंकिणी
पालीदन्तुरपिङ्गलांबरधरं गोपालबालंभजे ॥ ४ ॥

अघविहतिकराणां कृष्णनाम्नां गुरूणा
मनवरत मपाङ्गप्रावृषेण्यांबुवाहः ! .

ये यङ् यङो चिचेति चकारस्य बहुलग्रहणानुकर्षणार्थत्वा यङो लुक् प्रत्ययलक्षणेन यङन्तत्वा द्धातुरेव लोडादिद्विर्वचन अ चर्करीतं परस्मैपद मदादिव च्च द्रष्टव्य मिति वचना च्छपो लुक चर्करीत मिति यङ्लुगन्तस्य पूर्वाचार्याणां संज्ञा यङो वेतीड गमः शमलं मनोमलं शेमुषी मीयुषी मर्नाति सन्निहिता ईयुषी ति उपेयिवा नित्यादि ना लिटि भूतमात्रे भाषायां क्वसुः उपोपसर्गग्रहण मतन्त्र तेने यिवान् समीयिवा नित्या द्यपि संभवती ति वृत्तिकारादयः शारदे त्यत्रो पमा क्षिप्ता नीकारदे त्यनेन देवीरुचो व्यतिरेको ध्वन्यते अंभोजन्मेव वदनं वदनांभोजन्म उपमित मिति समासः धर्मग्रायो लो पे समासगा लुप्तोपमा एत द्विलोपे क्विप् समासगा तदेव रङ्गस्थली तत्र शैलूषी ति अ श्लिष्टशब्दनिबन्धनं केवलं परंपरितरूपकं अत्र सरस्वत्या श्शैलूषीत्वारोपहेतु वंद नांभोजन्मनो रङ्गस्थल्यारोपः. ॥ ३ ॥

केलीत्यादिः—मुरली वंशवाद्ये चे ति केशवः निलीनः श्लिष्टः धूमलं धूम्रं पिञ्छाञ्चलं बर्हाग्रं पिङ्गलं पीतम्. ॥ ४ ॥

अघेत्यादिः—अघविहतिकराणां ज्ञानसंपादनेन दुरितस्य दुःखस्या पि विह तिं नाशं कर्तुं हेतुभूतानां तच्छीलानां वा कृञो हेत्विति टः दुः खेनो व्यसनेष्वघ मि त्यमरः गुरूणां देशिकानां "गुशब्द स्त्वन्धकारःस्यो रुशब्द स्तन्निरोधकः अन्धकार निरोधित्वात् गुरु रित्यभिधीयते " इत्युक्तत्वा दज्ञाननिरोधिना मित्यर्थः अपाङ्ग एवप्राव

प्रविसरदनुकंपावारिसंभारसान्द्रो
मम हृदयमयूरं नर्तये दात्तमोदं ॥ ॥ ५ ॥

उदारचूडाधृतसत्कलापा सर्वांगरङ्गद्विलसत्कलापा ।
स्थलीनिलीनाकुलदेवतामे मलीमसंमानसमापुनातु ॥ ६ ॥

कालप्रदुध्वंसिफालप्रविलसितदृशासंभवे ! सुंभमाथ
प्रोच्चण्डे ! चण्डमुण्डार्दिनि! विशदतरारालदंष्ट्राकराले !

षेण्यांबुवाहः प्रावृषेण्यः प्रावृषि भवः प्रावृष एण्य इत्येण्यः अनुकंपैव वारि तस्य संभा र स्संभरणं हृदय मेव मयूरं " मयूरो बर्हिणो बर्हीं शुक्लापाङ्ग शिखावलः". इति वैजयन्ती नर्तयेत् परिस्पन्दयेत् हृदयं नवनवोन्मेषशालीकुर्या दिति यावत् आ त्तमोद मिति क्रियाविशेषणं अनेन नर्तनप्रयोजकत्वस्य निष्कृत्यभावेऽपि भगवान् स्वकृतेन तुष्ये दित्युक्तरीत्या स्वय मेव तुष्ये दिति द्योत्यते अत्र सावयवं समस्तवस्तु विषयं रूपकं समस्तवस्तुविषयं श्रौता आरोपिता यदा अपाङ्गस्यावयविन अंबुवाहत्वेन अनुकंपाहृदययो रवयवयो र्वारित्वेन मयूरत्वेन चाऽरोपणात्. वसुमुनिविरति र्ने न्मालिनी नौमयौ यः. ५

उदारेत्यादि.—कला आप्नोतीति कलाप श्चन्द्रः बर्हं ऽच सर्वांगेषु रंगन्तः व्याप्नुवन्तः विलसत्कलापा स्सर्पसमूहा यस्य रगि गत्यर्थः विलसन्त श्शोभमा नाः कलापा भूषणानि च कलापो भूषणे बर्हे तूणीरे संहता वपीत्यमरः स्थलीनिलीना कुलदेवते त्यनेन हरो हरि श्चोक्तौ मली मसं मलिनं ज्योत्स्नातमिस्रेति निपातः आ पुनातु आ समन्तात् शोधयतु तत्तदुचितशब्दार्थप्रतिबिंबनक्षमं करोत्विति भावः पूञ् पवने इह पवनं शोधनं तथा च पुनीते आत्मान मित्यादौ सकर्मकत्वं दृश्यते इति मा धवः अत्र हरिहरयो र्द्वयो रपि प्राकरणिकत्वा द्वयोः प्राकरणिकयोः श्लिष्टपदोपनि बन्धेनश्लेषोऽलंकारः विशेष्यस्यापि साम्ये द्वयो र्वोऽपादाने श्लेषः उपेन्द्रवज्रा जत जा स्ततो गौ स्या दिन्द्रवज्रा यदितौ जगौ गः अनन्तरोदीरितलक्ष्मभाजौ पादौ यदी या वुपजातय स्ताः

कालेत्यादि—दृशाया नेत्रात् संभवो यस्या हलन्ता दपि टापं वे त्युक्त्या टाप् सुंभमाथे सुंभस्य मथने मथे विलोटने माथे घञ् प्रोच्चण्डे अतिक्रूरे विशदतराभ्या

विश्वेशित्र्यंब ! शश्व द्वलयनिलयवासे ! नवांभोदवर्णे !
पादांभोजानतं मा मनुदिन मनुकंपाकुले ! पालयेथाः ॥ ७ ॥

कोदण्डं सशरं भुजेन भुजगेन्द्राभोगभाजा वहन्
वामेन छुरिकां विपक्षदलने दक्षेण दक्षेण च ।
कान्त्या निर्जितनीरदः पुरभिदः क्रीडाकिराताकृतेः
पुत्रोऽस्माक मनल्पनिर्मलयशा निर्मातु शर्माऽनिशं ॥ ८ ॥

नीलापगानिलयवर्यविराजमाने
कालोल्लसत्कुवलयावलिकेलिकारे
नाथे ! समस्तजगतां रमतां मनो मे
रामे सदैव रमणीयगुणाभिरामे ॥ ९ ॥

मत्वर्थे धवलाभ्यां अरालाभ्यां वक्राभ्यां दंष्ट्राभ्यां कराले भीषणे विश्वस्य ईशितुं शील मस्याः ईश ऐश्वर्ये सुप्यजातौ णिनि स्ताच्छील्य इति णिनिः नियन्तृत्व मधिपतित्व च ईशनं अंब ! अंबार्थनद्यो रिति ह्रस्वः शश्व न्नित्यं वलयनिलयवासे वलयारण्य सन्निहिते अनुदिनं दिने दिने वीप्सायाम व्ययीभावः नवांभोदस्य वर्ण इव वर्णो यस्या इति सप्तम्युपमानपूर्वपदस्य बहुव्रीहि रुत्तरपदलोप श्चेति बहुव्रीहि रुत्तरपदलोप श्चेति क्लोपेयमुपमा त्रिलोपे च समासगा म्रभ्नै र्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयं ७

कोदण्डमित्यादि—आभोगः परिपूर्णता आभोगो यत्नपूर्णते इति वैजयन्ती छुरिकां असिधेनुकां छुरति त्वगादिक मग्रेण च्छिनत्तीति छुरिका च्छुर् च्छेदन इति धातु रिति सुबोधिन्यां दक्षेण दाक्षिण्येन निर्जितो नीरदो येन अत्रोऽपमाऽऽक्षिप्ता शर्म निर्मातु मा माने मान मिहाऽन्तर्भावः तेनाऽकर्मकोऽपि अभिमनुमाति गृहं निर्मातीत्यादौ सकर्मकत्व मुपसर्गवशेनाऽर्थान्तरवृत्त्येति माधवः ८

नीलापगेत्यादि—नीलापगानिलयवर्ये नीलापगाभिधाने क्षेत्रवरे विराजमान इति सामीप्यातिशयो दर्शितः कालोल्लसत्कुवलयावल्या सह केलिं करोतीति

अत्यन्तोल्लसितं विभूषणगणै रुल्लाघतोल्लासकं
दीनानां गुरुमारुतालयगतं त्रैलोक्यभाग्याङ्कुरं।
निन्द न्निर्मलकान्तिकन्दलभरै रिन्दिन्दिरा निन्दिरा
लीलामन्दिर मिन्दुसुन्दरमुखं वन्दे परं दैवतं ॥ १० ॥

राज्ञा मेकावलंबे ज्वलनकुलभुवां शारदांभोदवर्णे
सव्ये भागे तुषाराचलसुकृतपरीपाकदेदीप्यमाने।
लक्ष्मीग्रामाधिवासे प्रणतिपरनृणां शश्व दक्षीणलक्ष्मी
दानोन्निद्रे दयार्द्रे रति रुदयतु नः कामदे वामदेवे ॥ ११ ॥

एता माशु कृतिं मम प्रथयता दद्या सिताब्जप्रभं
गाढाश्लिष्टगलं श्रिया परिलसच्चन्द्रावतंसोज्वलं ।

तया कर्मण्यणित्यण् सदृशगुणेनैव हि क्रीडा क्रियते तत्सदृशा इति यावत् वृत्तं वसन्ततिलकं तभजा जगौ ग इति ६

अत्यन्तेत्यादि—उल्लाघो नीरोग स्तस्य भाव उल्लाघता तस्या उल्लासक उत्पादकः उल्लासयतीत्युल्लासकः " राघृलाघृद्राघृसामर्थ्ये " इत्यस्मा दृण्वकथातो र्निष्ठाया मनुपसर्गात् " फुल्लक्षीबकृशोल्लाघा " इति निपात्यते . दीनानां व्याध्यादिभि र्दुःखितानां त्रैलोक्यभाग्याङ्कुरं सकल मपीप्सित मेतद्भजनेन सिद्ध्यतीति भावः इन्दिन्दिरान् भृङ्गान्. "भृङ्गो भ्रमर भृङ्गाण मधुलिण् मधुपाऽलिनः अलि र्द्विरेफो लोलम्बो भसलः पुष्पलोलुपः इन्दिन्दिरो मधुकर श्चञ्चलीको मधुव्रत " इत्यभिधानरत्नमाला इन्दु रिव सुन्दर मिति " उपमानानिसामान्यवचनै " रिति समासः उपमाप्रतिपादकस्य लोपे लुप्तोपमा वादे लोपे समासे सा कर्माधारक्याधि क्यङ्कि कर्मकर्त्रो र्णमुलि १०

राज्ञा मित्यादि.—ज्वलनकुल मग्निवंशः सव्ये वामे तुषाराचलसुकृतपरीपाक इति श्रीपार्वती हेतुहेतुमतोरभेदोपचारः सर्वान् कामान् ददाति कामं स्मरं द्यतीति च कामदः वामदेवः शर्वः ११

एतामित्यादि.—कृतिं प्रारभ्यमाणं प्रबन्धं " स्त्रियांक्ति " न्निति बाहुलक

नित्यं संभृतभूतिर्दलितदमनं निश्शेषभूतानतं
शश्वत्संश्रितसर्वमंगल मशोकावासवासं महः ॥ १२ ॥

लक्ष्मी मक्षीणरूपा मनिश मनुभवन् भूमिजां भूरिमोदं
तन्व न्नास्थां सुमंत्रे भुवि च तिलकयन् नन्वयं चित्रभानोः
विश्वामित्राधिकानन्ददविपुलभुजाविक्रमो विक्रमाख्यो
राजा रामाभिरामो जगदवनकलालालसी लालसीति ॥ १३ ॥

त् कर्मणि क्तिन् प्रथयतात् प्रख्यापयतात् प्रथ प्रख्याने भ्वादिः "हेतुमति च" ति णिच् अब्जा अब्जसा सिताब्जस्याऽसिताब्जस्य च प्रभेऽत्र प्रभा यस्य श्रिया नीलवर्णया कान्त्या च लक्ष्म्या च चंद्र एवाऽवतंसः शिरोलंकारः तेनोज्वलं चंद्रः स्वर्णे "स्वर्णोपि भूरिचंद्रौद्वा" वि त्यमरः तद्विकारो वतंसः किरीटं तेनोज्वल ञ्च भूति भस्म ऐश्वर्य ञ्च "भूति र्भसितं भस्म क्षारो रक्षा च निर्दिष्टा" इतिशब्दरत्नाकरः दन्ती गजासुरः "मेरुमन्दरसंकाशं गजरूपं महासुरं निहत्य तस्य कृत्ति न्तु कृतवा नंशुकं हर" इति स्कान्दे कुवलयापीड श्च तं दमयतीति तथा दमे र्णिजन्ता न्नन्यादित्वात् ल्युः "कर्मणिगम्यर्दि नाशीसूनिभ्य" इति नन्यादिगणे र्भोजश्च भूता भिंगिरिटिप्रभृतयः जना श्च संश्रिता सर्वमंगला पार्वती यस्तत् सर्वाणि मंगलानि च, यद्वा संश्रितानां सर्वमंगलं सर्वमंगलहे तुभूत मित्यर्थः हेतुहेतुमतो रभेदोपचारः अशोकावासे श्रीमदशोकपुरे वासः स्थिति र्यस्य तत् मह स्तेजः अत्र गुणगुणिनो रभेदो पचारात् तेजस्वी लक्ष्यते. तेजः प्राचु र्यञ्च फलं स च श्लिष्टविशेषणमाहात्म्यात् हरोहरि श्चे त्यायाति उभयानांसर्वासामि ष्टदेवतात्वेपि अत्रकृतिं मम प्रथयतादिति स्वप्रबन्धस्य प्रचयगमन प्रार्थनया त द्वि षये स्या मशोकपुरवासिन्यां देवतायां कवे रसविशेषा प्रतिपत्ति रनुक्तसिद्धा अत्रा पि द्वयोः प्राकरणिकयो रिति पूर्वोक्तश्लेषो लङ्कारः १२

अथ गुरुजनस्या पिदैवतेभ्यो भिमतया तदानीन्तनं निजगुरुभूतं राजानं भक्त्यतिशयेन चतुर्भि श्श्लोकै वर्ण्णयति लक्ष्मी मित्यादि. अक्षीणं अत्र नञ स्तद्विरुद्धार्थवाचित्वात् परिपूर्णं रूपं सौन्दर्यं स्वरूप ञ्च यस्याः भूमिजां लक्ष्मीं सीतां अन्यत्र भूमिजा मिति विशेषणानुक्त्या समस्ताचलांभोनिधिभ्यो जातां आयतिरूपां ल क्ष्मीं समृद्धिं अनिश मनुभवन् अयोनिजायाः वनितायाः अखण्डभूमिजाया स्संपद श्चाऽनु भवन् भूरिमोद मिति क्रियाविशेषणम् आस्थां तात्पर्यं आदर मिति यावत् "आस्था

तन्वानो धर्मजातस्थिति मजितसुहृत्प्रोल्लसद्भीमसेनो
यद्वासक्तो यमादौ सरसतरगवाकर्ण्यसंमोददाता ।

ेिहृया प्रतिज्ञायां तात्पर्ये स्ववशंवने ' इति वै आख्या मावि दोष माह कामन्तक: " अप्रयत्नं भृती मंत्र: प्रबल.मभि। ह्हेतु पातालसन्तत म्मणा संरक्षे सत्पर मनुसत " इति सुमन्त्रो सुमन्त्राख्ये मन्त्रिवरे मायादिदोषराहित्या च्छोभने कार्यनिरूपणे च तिल कयन् तिलकवन्तं कुर्वन् तत्करोती ति णिचि विम्मतो र्तुगिति मतुपो लुक् चित्रभानो रादित्यस्या मि च " सूर्यवह्नी चित्रभानू " इत्यमर: विश्वामित्रस्य विश्वामित्रमुने: वि शेषां सर्वेषां अभिप्रायां च अधिकमानंदं ददाति यतीव. विश्वामित्राधिकानंदद: राम इवा भिराम स्तत्तुल्य इत्यर्थ: जगद्रक्षने या कला शिल्पं " कला शिल्पे कालभे द " इति अमर: क्रियाभ्यासपूर्वको ज्ञानविशेष इति हर: गीतचित्रादिनपुण्य मिति टीकासर्वस्वे अत्र तु भवनविषयनैपुण्य तत्र लालसी औत्सुक्यवान् ' तृष्णातिरके याञ्चा वा औत्सुक्ये लालसा द्वयो ' रिति 'रुद्र: लालसो स्यास्ती ति लालसी लस श्लेषण क्रीडनयो: यङ्लुगन्ता द्दस्मा त्लसति विषये पु ष्टिलष्यति मनो नेनेति लालस: करणे घञ् तदन्ता दिनि: अनेन जगद्रक्षननैपुण्य मेव सर्वदा संपादयती ति प्रकाशितं लाल सीत्यस्यार्थ सौमते यङ्लुक् अत्र प्राकरणिकाऽप्राकरणिकयो: श्लिष्टपदोपात्तत्वे श्लेषो लंकार: अयं तु विशेषणसाम्य एव भवति विशेषणस्य साम्ये त्वर्थप्रकरणादिनवाच्यार्थे नियंत्रिते यदर्थान्तरावगमनं त च्छब्दशक्तिमूलध्वनिविषयं स्यात् एव मुत्तरत्र तन्वा नइत्यत्रापि १३

तन्वानइत्यादि.—धर्मजातस्य धर्मसुतस्य स्थितिं रक्षां रिपुपराभूत्यभा वे स्वाराज्यपदस्थापन मिति यावत् धर्मजस्यस्य प्रतिष्ठाञ्च अजितश्रीकृष्ण सुहृद्य स्य अजिता: केनाप्य परिभूता: सुहृदो यस्य अनेन दण्डापुरि कथासुहृदा मप्यजय्यत्वे किमुताऽस्ये त्युक्तं भवति. बलपराक्रमादिभि: प्रकर्षेणो ल्लसन्भीमसेनो यस्य प्रक र्षेणो ल्लसन्ती भीमा रिपुबलभयावहा सेना यस्येति च. यमयो र्यमलयो: नकुलसहदे वयो: आदिशब्देन. द्रौपद्याऽभिमन्युषु च अहिंसा सत्यापरिग्रहब्रह्मचर्यरूपे यमे आदिश ब्देन नियमादय स्तेषु च. आसक्त: सरसतरया अत्यर्थ विषादिरभया आंतरक्षये ति यावत् गवा धेनवा मधुरतरया गिरा च. " रसो रागे विषे वीर्ये तिक्तादौ पारदे द्रवे " इतिअमर: " गौ र्नाऽऽदित्ये बलीवर्दे क्रतुभेदर्षिभेदयो: स्त्री तुस्या दिशि भारत्यां

शश्वत्प्रभ्रेकलोजी भूरस्मिहि [illegible] विविधानक
सोऽयं विरोधशौरी विजयं [illegible] भूरितेजाः ॥ १४ ॥

[illegible]तंगुलगणं भुवनेऽत्यसक्ति
[illegible]विचिकित्से तमेव मिरेत्

[illegible] कऊ तैलमितिं [illegible]
[illegible] बहइवाहुकताक्षवाञ्छेत् ॥ १५

भूमौ च सुरभौ पथि भृशि भौ हस्तौ [illegible]लोमसिव " ति याद्वः समासान्त
गमसंज्ञा [illegible] समासान्तस्था निरयत्वं द्विभिभ्यां [illegible]
[illegible] एवं सतत [illegible] सम
सान्ताभावः [illegible] ददाति [illegible] तथ
" [illegible] सरलु निरं द्विपत्तु च शिखी च तेषां मधुरः [illegible]
प्रिय " इति कामन्दकः एकस्मिन् लोज एकलोजः [illegible]
लः शिव[illegible] समासः लोज [illegible] अत्यर्थे पूजितात् [illegible]
[illegible] सामूहितः [illegible] अत्र भूजे [illegible] आत्मा देहे
यस्य [illegible] आत्मा मनो यत्ने ति च इत्य
[illegible] जयति. जि जये जय उत्कर्षप्र
तिः भूरितेजाः अधिकतेजाः तेजः प्रभावे दीप्तौ च बले शुक्रे पी ति अमरः " अधिक्षे
पो वमानादेः प्रयुक्तस्य परेण यत् प्राणात्यये ष्यसहनं त त्तेज स्समुदाहृतं. [illegible]
[illegible] इति च " [illegible] भूरिचन्द्र ' निति सिंहः १४

यद्धति—सद्विद्यया [illegible] संख्यातु मिच्छेत् [illegible] मिरेत
मातुमिच्छेत् " [illegible] ' इती स अत्र लोपोऽभ्यास
स्ये [illegible] सुमेरु [illegible] वाराभिधौ तत्पु
रुषे [illegible] वाचस्पति दिवस्पत्यादिषु लुक् अहहे त्यरमुते
खेद इत्यमरः [illegible] तिष्ठन् [illegible]
इच्छायां अत्र असंभवद्वस्तुसंबन्धा निदर्शना संभवताऽसंभवता वा वस्तुसंबन्धेनगम्यम

क्षामो[illegible]
शिक्ष[illegible] पूर्ण[illegible]
त न्मन्ये जातभीतिः [illegible] कुहनासं[illegible] निलिल्ये
"पापोच्च[illegible]कलोपं" कलि रिह कलिजेतार मेनं विभाव्य ॥१६॥

स्वसीयोऽस्य खलु क्षमावल रिपो रश्रीमानवेदाभिध
स्सुरश्राव्य चरितं सुधाकर कुलश्रोणीभुजां पावनं
विद्वत्सम्मतचम्पुभारतनिबन्धत्याऽद्भुतार्थावली
सिन्धोः पूर्वतया च वर्ण्णयति त रजन्तो लभन्ता म्मुदं ॥ १७

मं प्रातार्मे[illegible] निदर्शना कज्जोतां गरितोलन मिव दोर्भ्या धाराधिधिवरण मिति
धेतत् [illegible] चिकयासे हर्षं [illegible] १५

क्षामइत्यादि — क्षामः क्षीणः क्षायोम इति निष्ठातकारस्य मकारः रक्ष्य
चोरादिभ्यः पालनं शिक्षा वर्णं संकरादि निरसन तयोर्दक्ष नैपुण्यं तस्योदयात् समगत
संगतवान् "सम्भोगम्प्रु[illegible] गत्यातिश्रीगदिभ्य" इत्यकर्मकात् गमे र्लङ् "गाग
म" इति क्तिवपक्षे "अनुदात्तोपदेशवनतितनोत्यादीना मनुनासिकलोपो झलि क्ङिती"
त्यनुनासिकलोपः तूर्णं अस्य लब्धप्रशमनकमय एव कुहना व्याजः निलिल्ये निलीनो
ऽभूत् लिङ् [illegible] पापेषु पापकर्म्मसु उपारी लालसा यस्य सः अनेन तत्कालीनानां
मपि प्रायेण पापतरत्वं द्योत्यते "पापोच्चाल[illegible]" मिति अस्य प्रबंधस्य रचनासमयकलि
दिनसंख्याऽपि विभाविता. कलेरात्मन स्वनिरसने उत्प्रेक्षणा हेतुः कली युद्धे जेता च
"कलि र्विभातके तस्य फलेऽर्थं च संयुगे युगे चतुर्थे च" त्यादि कोशः स्वरूपोत
प्रेक्षाऽऽलंकारः मन्ये शंके ध्रुव मित्यादयः उत्प्रेक्षावाचकाः अध्यवसाये व्यापारप्राधा
न्य उत्प्रेक्षा[illegible] व्यापारप्राधान्यं नाम तस्य
साध्यत्वं उत्प्रेक्षायां विषयस्य विषयेणा प्रतिपाद्यमान मपि तदात्म्य मेव प्रतीयते
इति तत्र विषयविषयिणोः पारमार्थिकात्यन्ताभावभासकपर्यन्तस्या व्यवसायस्य नि
वृत्ते. [illegible] १६

[illegible] लक्षणाकथन पूर्वकं किञ्चिद्वर्णितं प्रतिजानीते स्वस्रीय — इत्यत

श्रीमान्सीमातिगामी प्रसरमहिमा चन्द्रमा [illegible]
[illegible] रात्याजमान [illegible] रोहिणी[illegible]: ।
नेता दर्भैः पुराऽभू [illegible] उरुभुजाविक्रमाक्रान्तविश्व
क्षोणीचक्रान्तराणां भरतकुलभुवां भूभुजा मानभाजाम् ॥ १८ ॥

रि [illegible] रपरं [illegible] इतिहः अत खलु [illegible]रिपो [illegible]महेन्द्रस्य विक्रमा[illegible] राज्ञः सुश्राव्यं अपेक्ष्यं [illegible] भू भवने "ओरावश्यक" इति व्यः सु [illegible]कुलक्षोणिभुजां सोमवंश्यानां विद्वत्संमतो य चंपुभारतनिबंधः तस्य विद्वत्सं[illegible] [illegible] स्भुतार्थावलीसिन्धो चंपुभारतस्य पूर्तनये स्यनेना [illegible]पि तद्गुणा [illegible] [illegible]ति अनुसा[illegible] मेव प्राचीनं चंपुभारत मिति चंपुभारतकृतो वचन मनुसृत्य च चंपुभारतनिबन्धस्य [illegible] [illegible]मन्ता प्रार्थनाया [illegible] [illegible] संतो [illegible] [illegible]मिस्यनेन " [illegible] मधुर [illegible] [illegible] रस [illegible] [illegible] [illegible] [illegible]: [illegible]यन्ति [illegible] [illegible] " श्रीकृष्णचंपूकर्तृतया संत इदं काव्यं संशोध्या नुकम्पन्त्विति भावः ॥ १७

अथ प्रबन्ध मारभते **श्रीमा नित्यादि** श्रीःशोभा [illegible] अस्ती ति श्रीमा न् [illegible] अस्ती ति मतुप् "भूम निन्दाप्रशंसासु नित्ययोगे तिशायने संसर्गे [illegible] विवक्षायां भवन्ति मतुबादयः" सीमा मतिक्रम्य [illegible] [illegible] सुप्यजाता [illegible] [illegible] प्राग्वति समासः [illegible] सुपसुपासमासः सीमातिगामी [illegible]: प्रसरः प्रसरण [illegible] महिमा [illegible] ति पुर [illegible] बहुव्रीहिः "पृषत्स्यदः [illegible]" इति [illegible] "[illegible] सुमह [illegible] सोम [illegible] वर इयाज राजसूयं स सहस्रशतदक्षिणं होता [illegible] [illegible] [illegible] भगवान् [illegible]: हैरण्यगर्भ [illegible] [illegible] मीयवान् सदस्य स्तत्र भगवान् हरि [illegible]: प्रभुः सनत्कुमारप्रमुखै [illegible] [illegible] [illegible]: दक्षिणा [illegible] [illegible] [illegible] नः श्रुतम् इति श्रीहरिवंशो [illegible] महत्वातिशयप्रख्यापना [illegible] सीमातिगामि प्रसरमहिमे [illegible] [illegible] [illegible] [illegible] मिति चन्द्रमा [illegible]: "इन्दु [illegible]चन्द्रमा ओषधीश [illegible] राजा रोहिणीवल्लभोऽब्जः [illegible]: [illegible] [illegible] प्रसूतिः प्रालेयांशु [illegible] [illegible]' इत्यभिधानरत्नमाला [illegible] [illegible] [illegible] [illegible] पुराभूत् पुरि [illegible]ति [illegible] प्रभवत्यस्मा दिति प्रभवः [illegible] [illegible] भरतकुलभुवां "भर्तव्योऽयं त्वया यस्मा [illegible] [illegible] [illegible] तस्मा [illegible] [illegible]

गात्रे यस्य गुणोत्तरे समुदभू त्मूभारहारोद्यतः
पूर्णानन्दमय स्स्वय न्त्रिजगतीनाथ स्स नारायणः
अद्धा मूर्द्धनि य स्सदा भगवता संभाव्यते शंभुना
यस्याऽजायत विश्वलोकजननी लक्ष्मी स्स्वयं सोदरी ॥ १९ ॥

श्रश्व त्पादनिषेविविश्वजनतापच्छेदबद्धोद्यमः
कालोन्मीलितनीरजन्मसुषमाहारी तमस्तोमहा।

---

*ाभ्रो भरतो नाम ते सुतः भरतात् भारती कीर्त्ति र्येने दं भारतं कुलं अपरे ये च पूर्वे च भारता इति ते सुताः इति श्रीमहाभारतोक्त्या भरतात् पूर्वेषा मपि तत्कुलीनत्वं भवत्वं १८

गोत्र इत्यादि—गुणे उत्तरे श्रेष्ठे वंशस्य गुणा वंश्यानां उभयकुलपरिशुद्धत्वं यथाविधि विहितचत्वारिंशत्संस्कारसंस्कृतत्वं शौर्याद्य श्च सम्यगनावृतत्वेन " त मद्भुतं बालक मंबुजेक्षण श्चतुर्भुजं " इत्याद्युक्तस्वरूपेण उदभूत् प्रादुर्बभूव असमासेप्यैकत्वं नियमित मपि चित्तवनेश्वकिम [illegible] ख्यातेनो पसर्गाणा मित्येकत्वनियमात् समुदभू दित्येकात्वं " तेप्राग्धातो " रिति सम्मुदोः प्राक्प्रयोगः भारहार शब्दो कर्म्मकार्यवा मन्तौ हारे उद्यत इति सप्तमीतियोगविभागात् समासः इहा तु के स्समासार्थे द्वितीयेत्यादि लण्ड्यतां कृताबहुल मित्येतत् बाहुल्यं वा विवृत्भताम्मिति सर्वस्वे आनन्दमय इत्यत्र तत्प्रकृतवचने मयडिति मयट् प्राचुर्येण प्रस्तुत आनन्द एवेत्यर्थः पूर्ण श्चा सा आनन्दमय श्च यद्वा मयट् तद्रूप इति केचि दिति प्रचनीतं पूर्णानन्दस्वरूप इत्यर्थः तिसृणा ञ्ज गतीनां [illegible] त्रिजगती तद्धितार्थे ति समासः अद्धा समक्षं संभाव्यते सम्मान्यते संपूर्वात् [illegible] सोदरीनास्ति कोदरीत्यादिना वा ङिप् १९

श्रश्व दित्यादि—पादाना रश्मीनां " [illegible] पांघ्रितुर्यांशा " इत्यमरः विश्वजनाना न्तापच्छेदे उष्मापनयने बद्धोद्यमः का[illegible]लितानां नीरजन्मनां निमीलयितृत्वेन सुषमाहारी. " सुषमापरमाशोभे " त्य[illegible]स्तोमं निबिडतरं तिमिरं हन्ती ति तथा अत्र चतुर्विधनियमाभावेऽपि हि[illegible]कालिकः किव न्वे ति क्विपिति माधवोक्त्या क्विप् प्रसूनाशिशिर मस्तु मा[illegible] मित्यर्थः

आतन्व न्नतनुं प्रसूनविशिखं गौरीकृताशोदय
स्सेव्य स्सत्सदसा त्रिनेत्रसमितो यो वा बहुश्रीधरः ॥२०॥

अभव दथ बुधोऽस्मा दब्जत स्तारमुक्ता
मणि रिव शुभवृत्तो गुंफित स्सत्गुणेन ।

गौरीकृता धवलीकृता स्सर्वा आशा येन स गौरीकृताश; तादृश उदयो यस्य सः सता नक्षत्राणां सदसा सेव्यः सेवितः "कृत्यल्युटो बहुल मिति बहुळग्रहणात् कर्म्मणि कृत्यः "ताराभं रात्रिजं धिष्ण्यां स नक्षत्र मुडु र्मने" ति निघण्डुः. "नक्षत्र मृक्षभं ज्योति स्स न्ति तारोडु तारकास्ति स्रो नपुंसके च स्यु" रिति शब्दरत्नाकरः बह्वीनां विपुलानां श्रीणां शोभाना न्धरः धरती ति धरः पचा द्यच् अत्र चन्द्रस्य त्रिनेत्रसमित इति च्छेदा द्धरसाम्यं बहुश्रीधर इत्यनेन हरिसाम्यञ्च प्रतीयते त्रिनेत्रेस मित स्समकृितः सदृश इति यावत् बहुश्रीधरः प्रायेण श्रीधरतुल्यः विभाषा सुपो बहुच् पुरस्ता त्तु इति बहुच् कीदृशौ तौ शश्वत् पार्दानेधविष्ण्या विश्वजनताश्च आपन्छेदे बद्धोद्यम इत्युभयत्र तुल्यम् भृङ्गसञ्चलनादिकं विना विकसनोचितसमये स्वयमेवउन्मीलितानां सिताब्जानां सुषमाहा री ति हरे ललयोरभेदात् काल श्च तदुन्मीलित श्चे ति विशेषणं विशेष्येणेत्यत्र बहुलग्रहणात् कुब्ज खञ्जवत् समासः तन्नीरजन्मच कालोन्मीलितनीरजन्म नीलोत्पलं तस्य सुषमाहारी ति हरौ तमस्तोममविद्यार्जितपापसञ्चयं अज्ञानपूगञ्च हन्ती ति तथा एव मुभयत्रापि समानं "तमस्तुक्ली पापेनरकशोकयो" रिति निखण्डुः प्रसूनविशिख मतनु मातन्वन् तृतीयनयनाग्नौ शलभतां प्राप्य मिति हरे अतनुं प्रसूनविशिख मातन्वन् दग्धं कामं प्रद्युम्नात्मना रपादय मिति हरौ काम[redacted]त्पादनयोः प्रवाहनित्यत्वा दातन्वन्निति वर्तमाननिर्देशः गौर्यो पार्वत्यां कृत आशो[redacted] स इति हरे गौर्यां सरस्वत्यां कृत आशोदयो येन सः गौरीकृताशः ब्रह्मा त[redacted] यस्मात् स इति हरौ "गौरी शिवासरस्वत्यो" रिति केशवः सन्त स्सा[redacted] स्तेषां सदसा सेव्य इत्युभयत्र अत्र विशष्यस्य पृथगुपादाने प्राकरणिका प्रा[redacted] श्लिष्टपदोपनिबन्धे श्लेषोलंकारः २०

अभवमि[redacted]—अस्मा चन्द्रा दब्जत श्शङ्खादब्जौ शङ्खशशाङ्कौ चेत्यमरः "द्विपेन्द्र जी[redacted] शङ्ख मत्स्या हिशुक्त्युत्भव वेणुजानि मुक्ताफलानि प्रथितानि लोके तेष[redacted]स्युद्भव मेव भूरि इत्यगस्त्यरत्नशास्त्रे शङ्खस्यापि मुक्तोत्प

अतिललित महेलावर्तुलोत्तुंगपीन
स्तनभरपरिषंगश्लाघितो लब्धवर्ण्णः ॥२१॥

निखिलजगतीचक्रव्याप्तोरुकीर्त्ति रतो बुधा
दिह शुभकृता माद्यो नाम्ना नृपोऽथ पुरूरवाः।
द्विजवरकुले संभूताना मशेषमहीभुजां
प्रथम मुदभू न्मन्त्रौघाणा मयं प्रणवो यथा ॥ २२ ॥

योऽसा विलापति रिलातनयो विचित्रं
स्त्रीमातृकोऽपि खलु पूरुषमातृकश्च ।

त्तिस्यानत्व मुक्तं तार उज्वलं वृत्त ञ्चारित्रं निस्तलत्व ञ्च "वृत्तं पद्ये चरित्रे त्रिष्व तीतदृढनिस्तले" इत्यमरः गुंभितः प्रथितः संबन्धश्च गुफगुंफग्रन्धे गुण स्सूत्रंत्रशावी र्यादय ष्षण्णवतिराजगुणा श्च षण्णवतिराजगुणा इति रत्नकोशः गुणेने ति जातावेक वचनं गुण्यन्ते प्रार्थ्यन्ते सद्भि रिति गुणाः महेला स्त्री महती इला मनुसुता च लब्धव र्णः प्राप्तकान्तिः अनेन षाण्मासित्व मुक्तं विचक्षण श्च अत्रश्लेषानुगृहीता वाक्यार्थोपमा लङ्कारः २१

निखिलेत्यादि—निखिलजगतीचक्रे सर्वैः क्रियमाणत्वा दन्यत्र प्रशस्य मानत्वा च्च व्याप्ता उर्वीमहती पूजिते ति यावत् कीर्त्तिः कीर्त्तन ञ्जपः यशश्च यस्य सः कीर्त्तिः पुण्यंकर्मप्रथा अत्र हेतु श्शुभकृतामाद्य इतिशुभकृतां शुभकरणानां पुण्यक र्तृणां श्च द्विजवरकुले ब्राह्मणसमूहे संभूतानान्ते दृष्टाना मित्यर्थः मन्त्रौघाणां प्रथम आ दिभूतः इतरत्र सोमवंशोत्भूताना मशेषमहीभुजा मास्तिशेषोन्यत्र स्थित एषा मित्यशे षाः मन्त्रौघाणा मित्यत्र प्रातिपदिकान्तनुंविभक्तिषुचे ति अधिकारे कुमतिचे ति णत्वं अत्र नुट आ म्विभक्तित्वा मामीत्यस्य विभक्तित्वं अय मित्यनेन महिम्नः प्रत्यक्षत्वं प्रदार्शितम् प्रणवो यथा प्रणव इव स्थितः नसमरसला ष्षड्भि र्वेदै र्हयै र्हरिणी गुरुः २२

योसा वित्यादि इलापतिः भूपति रिलातनयः इळा नाम मनो रपत्यार्थ यज्ञानन्तर मेवो त्पन्ना तनूजा तस्या स्तनूजः स्त्रीमातृको पि अन्येषा मिवा स्या ।प

वाणीविराजिवदनाम्बुरुहोऽपि नित्यं
वाणीविदूरतर एव वरीवृती ति ॥२३॥

अभूदभूतोपमभूरिभूति
र्नृपोनृपालावलिमौलिभूतः ।

स्त्री एव माता तथा पि पूरुषमातृकः सैव पुन रिला वसिष्ठप्रभावा त्पुंस्त्वं प्राप्य सुद्यु म्नसंज्ञः मृगयाप्रसंगेन इलावृतं स्त्रीजनैकसेव्य मुपगम्य भगवतो परमेश्वरस्य शापात् स्त्री भूत्वा पुनर पि वसिष्ठप्रार्थनया परमेश्वरानुग्रहात् पर्यायेण मासं पुमान् मासं स्त्री चा भू दिति श्रीभागवते वाणीविराजिवदनाम्बुरुह इत्यनेन वदनाम्बुरुहे सरस्वत्या नित्यसा न्निध्य मुक्तम् अनेना स्य समस्तविद्यानिष्णातता तत्तदौचित्येन प्रस्तुतेषु वाग्विलासे [illegible] द्योत्यते वाण्या वाचा विदूरतर एव दूर एव अल्पाच्चतर मिति व त्स्वा [illegible] प् परीवृतीत अत्यर्थं वर्तते वृतु वर्तने यङ्लुक् यद्वा अतिशायन एवतरप् वरी [illegible] पौनः पुन्ये च एवंसति वाचो ह्यर्थ न्दूर एव पुनःपुनर्वर्तत इत्यर्थः संपद्यते अनेना स्यगुणगणाना मपरिच्छेद्यतया वर्णयितु मशक्यत्वे पि गुणप्रशंसनलोभात् [illegible] नां पौनः पुन्येन वाचां प्रवृत्तिः द्योत्यते अत्र विरोधो लङ्कारः वि रुद्धाभासत्वं विरोधः अयंविरोध स्समाधानं विना प्ररूढो दोषः सति तु समाधाने प्र मुख एवा भासत्वा द्विरोधाभासः अत्रापि शब्दः प्रतिभासमाने र्थैविरोधार्थः विरो धाभावे च शब्दार्थः. २३

अभूदित्यादि—अभूतोपमा अन्यत्रा दृष्टपुर्वे त्यर्थः भूरि र्बह्वी भूति स्सं [illegible] र्यस्य मौलिभूतः प्रधानभूत इत्यर्थः सुप्सुपेति समासः अहीना मखण्डा ह्लयन् स्वा [illegible] न्तरा न्कुर्व न्नित्यर्थः सदा नन्दं करोति असदानन्दं छिन्दती ति च क्विप्तुक्च् [illegible] कृती छेदने अत्र करोतिकृन्तत्योः प्रकृत्यो रपि तुल्यं रूप मिति प्रकृतिश्ले [illegible] सरस्वतीकण्ठाभरणे "प्रकृतिप्रत्ययार्थौ तो विभक्तिवचनाश्रयौ पदभ्न [illegible] क्वा चे ति शब्दश्लेषाभवान्ति षडिति असतां प्रतिषेध श्च सता ञ्च परिपालनं [illegible] परो धर्म्म स्समरे चापलायन मिति श्रीमहाभारते" अत्र छेकानुप्रासः सं [illegible] पूर्वे छेकानुप्रासः अत्र नृपो नृप इति द्वौ व्यञ्जनसमुदायौ मिथ स्सह [illegible] एवं महीमहीना सदासदे त्यनेकप्रकारत्वं कि नाम मदूरदूरव्यवसायसाय मित्या द्रेवत् शब्दपौनरुत्वय न्तु व्यञ्जनमात्रपौनरुक्त्य मित्यत्र रामशब्देन स्वरसाम्यनिय

महीं महीना इकुलयन् कराग्रे
सदा सदानन्द कृदायुरस्मात् ॥२४॥

अजायना जातसपत्नजात
स्सुजातजन्मा नहुषोऽथतस्मात् ।
नजम्यमानावनिपालमौलि
नेनिज्यमानामलपादपीठः ॥२५॥

निम्न मसत स्सततं स सत स्सति योजय न्पथि प्रथितः,
भुव मभुनक् जलधिमितां भुजबलनिर्धूतदुर्मदारितितिः ॥ २६ ॥

मी व्यावर्त्यते न तु तदभाव प्रतिपाद्यते अतो महीना मित्यादौ स्वरसाम्य प्रदोषाय प्रथमपादे तु "भूम्" इति केवलव्यञ्जन सादृश्यरूपा वृत्यनुप्रासः तस्मा दनयो स्सं सृष्टिः उपेन्द्रवज्रा जतजा स्ततो गौ २४

अजायते त्यादि - जातः जनीप्रादुर्भावे श्यन् "ज्ञाजनोर्जा" अजात मनुत्पन्नं सपत्नजात शत्रुसमूहो यस्य प्रभावातिशयेन नको प्यमुं परिबुभूषति से ति भावः सुजात ग्रहपञ्चकादि स्थित्यादिभि श्शोभन जन्म यस्य सः अनेन दिव्यभाव त्व मुक्तम् नजम्यमाना अत्यर्थं पौनःपुन्येन नमन्तः मौलिः किरीटं तेन नेनिज्यमानः अत्यर्थं शोध्यमानः णिजर् शौचपोषणयोः अस्मा द्यङन्ता यङ् "अतो लोप" इत्य कारलोपः नपदान्ते ति तस्य स्थानिवत्वनिषधा द्यस्य हलइति यलोपः ॥२५॥

निम्न मित्यादि—असतः निम्न मत्र शेषत्वे नाऽविवक्षिततया आसिनिग्रह श्चे ति षष्ठ्यभावः अभुनक् रक्षितवान् भुञ्जानवन इति पालने तङो निषेधात् परस्मैप दम् "आद्यप्रथमदलोक्त यदि कथ मपि लक्षणं भवे दुभयोः दलयोः कृतयतिशोभा न्ता इति इगीतवान् भुजङ्गेशः ॥ २६ ॥

आमोदे त्यादि –आमोदः सौरभ्यं हर्षश्च मुद हर्षे आङ्पूर्वं स्सुरभीभावे च आमोदौ हर्षसागन्ध्ये इतिव सुमनसः पुष्पाणि सन्त श्च वदान्यो बहुप्रदः राजपक्षे

आमोदभाजां सुमनोगणाना मालम्बभू राविरभू दमुष्मात्
मान्यो वदान्यो नृपति र्ययातिः पयःपयोधे रिव पारिजातः॥ २७ ॥

तस्मि न्नीतिविनीतिविक्रमनिधौ विन्यस्य विश्वंभरा
भारं भोगपरंपरा मतिचिरं बोभुज्यमानो वसन् ।
भूयो भूरितरेण पुण्यनिकरेणाऽऽसादितोऽसौ दिवं
सद्यस्संभृतसम्मदे सुमनसां संघै श्च संभावितः ॥ २८ ॥

॥ ग ॥ तत स्स वृत्रापुरवधागसा वित्रासिते सुत्रामणि कुत्रा पि सपदि नाकलय मपि ना कलयति रोहिते रोहिताश्वमुखे रखिले रपि बर्हिर्मुखै रराजकतया जातशोकै र्नाकलोकाधिपत्ये कृताभिषेको यथा भिलाष मखिल मपि भोगजात मनुदिन मनुबोभूयमानः कदाचन वलवैरिजायां वलजां पुलोमजां विलोकयन् विषमेषुविशिखविदूषितम

वत्गुवागि त्यपि "वदान्यो वत्गुवा ग्दाता" रितिवै ॥२७॥

तस्मि न्नित्यादि—नीति र्नयः विनीति र्विनयः बोभुज्यमानः पौनःपुन्ये ना त्यर्थं अनुभवन् आसादितः प्राप्तः आडम्बदः पर्यर्थे पर्यायो गतिः आ धृषा द्वे ति विकल्पिति णिचकः सम्मदो हर्षः प्रमदसम्मदौ हर्षे इति निपातः संभावित श्चाभू दि ति शेषः अत्रनीतिविनीतिविक्रमनिधा विति राज्यभारविन्यासस्य हेतुतयोपन्यासात् का व्यलिङ्ग मलङ्कारः "हेतो र्वाक्यपदार्थत्वे काव्यालिङ्गम्". ॥२८॥

* **तत इत्यादि**—वृत्रा सुरवधागसे ति वृत्रहत्याया म्मलिनतरं युवतिरूपमा सायाऽभिसरन्ती मालोक्य वृत्रारिः पलायमानः कुत्राऽपि बिसविवरे बहुकालं गूढ म वात्सी दिति श्रीमद्भागवतोक्तेः कर्त्तरि तृतीया अत एव त्रासित इति णिच् नाकस्य ल यो नाकलयः त माऽऽकलयति अगणयति अनेन भीत्यातिशयः प्रकाश्यते सुप्सुपेति नशब्दस्य समासः रोहिताश्वमुखै रोहिताश्वोऽमिः भुज्यत इति भोगः भोगवस्तु अनुबोभूयमानः अत्यर्थ मनुभवन् वलजां वल्गुदर्शनां वलजावल्गुदर्शने त्यमरः पुलोमजां शचीं वाहकभावः वाहकत्वं अपात्रं पात्रं कृतः पात्री कृत अभूतत द्भाव इति

ना स्सपदि तदभिसरणेहया वाहकभावपालीकृतमैत्रावरुणिशापा द्वाहसभावं समीय भूयः क्षिप्रजाततत्प्रसादा निजवंशजा देव भवित्रीं शापमुक्तिं प्रतिपन्नमोदं प्रतिपालय न्यामुनाभिधानस्य गिरिवरस्य गरीयसी न्दरीं कष्टतरदिष्टवला दध्यशयिष्ट ततो ययाति स्तु पुरुहूतेन पुरा पुरूरवसे प्रतिपादितं प्रतिष्ठानाभिधान मखिलविभवाधिष्ठानभूत मधिष्ठानवर मधिष्ठायऽभीष्टदानैः प्रतीष्टमोदाः क्षरदमृताक्षैरुदितै रञ्जसा रञ्जिताः प्रजाः प्रजा इवनिज्याः परिपालय न्प्रत्यर्थितव्रजा नत्यर्थ मुल्लापयमानो विश्वविश्वंभरावलयवर्त्तिना निश्शेषराजकेन करंहारय न्नाशावशा दाशावलया दागत्य भूतेषु सकलभूतेषु गव्य

च्चिः मैत्रावरुणि रगस्त्यः वाहसभाव मजगरत्वं "अजगरे शयु र्वाहस इत्युभा वित्यमरः समीय संप्राप्य ईङ् गतौ ल्यप् क्षिप्रजातेत्यनेन तत्क्षण मेव प्रणिपातादिभिः प्रसादितवा निति दर्शितं निजवंशजा धर्म्मसूनोः भवित्रीं भाविनीं सार्वकालिक स्तच्च गरीयसी द्गुरुतरां द्विवचनविभज्ये तीयसुनि प्रियस्थिरे ति गुरुशब्दस्य गरादेशः उगितश्चेति ङिप् दिष्ट न्दैव न्दरी मित्यधिशीङ्स्थासां कर्मसंज्ञा अध्यशयिष्ट शयितवान् "अपादपदसन्तानो गद्य माख्यायिका कथे ति तस्य प्रभेदौ द्वौ तयोराख्यायिका किलनायकेनै व वाच्याऽन्या ना यकेऽने तरेण वा "इति दण्डी " पादाना न्नियमो नास्ति छन्दो यत्र न विद्यते समासपदभूयिष्ठ न्त त्तु गद्य न्निगद्यत " इति मानसोल्लासे.

तत इत्यादि—प्रतिपादितं दत्तं प्रतिष्ठानाभिधानं प्रतिष्ठानसंज्ञं अधिष्टानवरं पुरश्रेष्ठं अधिष्ठान न्तु नगरे रथचक्रप्रभावयो रित्यमरः प्रतीष्टः परिगृहीतः इषु इच्छायां क्षरदमृताक्षरे अक्षरशब्देन प्रमुखत एव माधुर्यं व्यज्यते उदिते वचने नपुंसके भावे क्तः अञ्जसा यथाव द्रञ्जिताः रञ्ज राग इत्यस्मा द्धेतुमण्णिचि क्तः " प्रजा स्या त्सन्ततौ जन " इत्यमरः प्रत्यर्थितव्रजान् रिपुश्रेष्ठान् दुर्जया नित्यर्थः प्रशंसावचनै श्चे ति समासः उल्लापयमानः न्यग्भावयन् निजानिदेशकायत्तानिखिलवृत्तीन् कुर्व न्नित्यर्थः लीङ् श्लेषणे लिय स्संमानने ति शालीनीकरणेऽआत्मनेपदं न्यग्भावन न्त द्विभाषालीयते रित्यात्वे पुक् राजकेन राजसमूहेन गोत्रोक्षेत्यादिना

तो जनात् गव्यया ग्रामीयतो ग्रामतया केदारीयतः कैदारिकेण भिक्षीयतो भैक्षेण च यथामनोरथं सर्वदा संप्रदानीकुर्वन्नुरुहूत इव भूभृत्कुलाधिनेता वैश्वानर इवाश्रिताशापूरणमनाः कृतान्त इव क्रूरदण्डधारणदत्तचित्तो निरृतिरिव पुण्यजनपरिशोभितपार्श्वभागो वरुण इव भृशमहितपाशो द्धर्ता समीरण इव सदागमलोलः कुबेर

वुञ् अत्र हृक्रोरन्यतरस्यामिति कर्मसंज्ञाया विकल्पितत्वात् कर्तरि तृतीया आगत्य भूतेषु आगते ष्वित्येवार्थः मयूरव्यंसकादय श्चेति समासः गव्यतः आत्मनो गा मिच्छतः ग्रामीयत इत्यादिषु त्रिष्वप्येवं सुप आत्मनः क्यजिति क्यच् गव्यया गोसमूहेन खलगोरथादिति यत् ग्रामतया ग्रामसमूहेन ग्रामजनेति तल् कैदारिकेण केदारसमूहेन केदारः क्षेत्र केदारा यञ्चेति वर्तमाने ठञ् कवचिनश्चेति ठञ् भैक्षेण भिक्षासमूहेन भिक्षादिभ्योऽणित्यण् संप्रदानीकुर्वन् संप्रदीयतेऽस्मा इति संप्रदानं गृहीता महीता संप्रदानं स्यादिति [illegible] गव्यादिभ्यो यथाकामं तत्तत्प्रयच्छन्नित्यर्थः भूभृत्कुलानां गिरिसमूहानां राजसमूहानां च [illegible] आधेता नायकश्च आश्रितस्य स्वाधीनतरस्य [illegible] [illegible] [illegible] इति वैश्वानरे आश्रितानामाशायाः पूरणमित्यन्यत्र क्रूरस्य दण्डस्य [illegible] क्रूरप्राप कृत्सुदण्डधारणे चतुर्थोपायप्रयोगे च पुण्यजना राक्षसा सज्जनाश्च "यातुधानाः पुण्यजना नैरृता यातु रक्षसी" त्यमरः "राक्षसं[illegible] पुण्यजना" [illegible] भृशमहितस्यात्यर्थमाहतस्य पाशस्य उद्धर्ता धारकः [illegible] [illegible] पाशप् याप्यः कुत्सितः कुत्सितानां महितानां [illegible] उद्धर्ता उन्मूलयिता च [illegible] सदा सर्वदा गमं गमनं "ग्रहवृदृनिश्चिगमश्चे" त्यप् सदागमेषु मच्छास्त्रेषु [illegible] स्तूपदेशेऽपि शास्त्रे [illegible] [illegible] गुह्यकानां स्वामी अयस्वामीति [illegible] रिति निपातः [illegible] काये यस्य "[illegible]भ्योऽतीति वक्तव्य मिति क्यप् [illegible] पला दासवर्गस्यायमुपभोगं [illegible] [illegible] इत्यर्थः [illegible] रिव "हरविष्णू वृषाकपी" इत्यमरः वृषा वृषभः वा इन्द्रः वृषो धनश्च "वृषाकपायी श्रीगौर्यो" रित्यमरः हारं हरसंबन्धि हारिसंबन्धि च तस्येदमित्यण् यस्ये ति चेत्यकारेकारयोर्लोपः तेन उज्ज्वलं [illegible] अङ्गं हाराउज्ज्वलाङ्गं तत्र कान्तिरिच्छा यस्यास्सा कमु कान्तौ कान्तिरिच्छा हारो मुक्तावली तेनोज्ज्वला अङ्गकान्तिश्शरीरशोभा यस्ये ति च कन दीप्तौ सत्ये सत्यलोके सत्यायां सत्यभामायां सत्यां सतीदेव्यां

इव गुह्यकार्यः वृषाकपि रिव वृषाभिरक्षी वृषाकपायीव हारोज्वलांग कान्ति र्मूर्तित्रयीव सत्यालीनमना इन्द्रावरुणा विव विततगोराजी वि नतविमतनृपतिविततिविकटमकुटतटघटितमणिघटामरीचिवीचिनीरा जितपदपल्लव स्सन्ततसन्तन्यमानदानबंभज्यमानमानदिव्यपादपोऽय मदेदीप्यत ॥ १ ॥

क्षत्राधिनाथान्वयसंभवो पि नक्षत्रनाथान्वयसंभवोऽसौ ।
हितप्रदाताऽप्यहितप्रदाता कथ श्चरित्रं कथयेऽस्य चित्रम् ॥ २९ ॥

येन स्वसमता नीताश्शश्व द्विश्वेऽपि बान्धवाः ।
अभूव न्मेदुरामोदा स्सोदरा इव सादरम् ॥ ३० ॥

सत्ये तथ्ये च आलीनं मनो यस्य इन्द्रावरुणौ देवताद्वन्द्वे च त्यानड् वितता गोराजिः नेत्रसमूहो जलसमूह श्च ययोः विततायां विस्तृतायां एवि भूमौ विततामि गोभि र्वा गिभ र्वा राजितुं शील मस्ये ति सुप्यजाता विति णिनिः विमतनृपतय श्शत्रुभूपा स्स न्तन्यमानेन यथावत्क्रियमाणेन दानेन हेतुना बंभज्यमान; अत्यर्थं भज्यमानः यङन्ता त् कर्मणि यक् भञ्जो आमर्दने तादृशो मानो यस्य दिव्यपादपस्य अदेदीप्यत शुशुभे. **पुरुहूत इवेत्यादि** रुपमा त्र भूभृदित्यादीनां श्लिष्टतया साधर्म्यं तदुक्तं स्फुटमर्थाल ङ्कारा वेता वुपमासमुच्चयौ कि न्त्वाश्रित्य शब्दमात्रं सामान्य मिहा पि संभवत इति हारोज्वले त्यत्र लिंगश्लेषः गोराजीत्यादिषु वचनश्लेषः ॥१॥

क्षत्रे त्यादि—क्षत्राधिनाथान्वयसंभवः क्षत्रवंशजातः अहितप्रदाता शत्रु खण्डयिता दो अवखण्डने तृच् अत्र विरोधो लंकारः ॥२६॥

येने त्यादि—स्वसमतां शयनवसनभोजनादिषु सार्वभौमेनाऽऽत्मना तुल्य तां प्रापिताः एत दामोदमेदुरत्वे हेतुः विश्वे सर्वे मेदुरः वर्द्धनशीलः भञ्जभासेतिघुरच् नीतो बन्धुजन स्त्वयाऽऽत्मसमता मिति श्रीहर्षः श्लोके षष्ठं गुरु ज्ञेयं सर्वत्रलघु पञ्चमम् ॥३०॥

कि मित्यादि—रिपु मपि चाऽऽत्मनासमानं व्यातेने किं ब्रूमः अत्यद्भुत

65901

किं ब्रूम स्सपदि महापदं प्रपन्नो यःकान्तारमित उदञ्चितप्रतापः।
उद्धर्ता स्वजनपदस्य कण्टकानां व्यातेने रिपु मपि चा त्मना समानं ॥३१॥

उद्धारं परभूभृतां विरचय न्नद्धा य मिद्धादरं
श्रद्धालुःकलधौतराशि मनिशं पृथ्वीसुरेभ्यो दिशन्।
उद्धृत्या र्पयितेव मा मपि बतेत्यार्त्तस्स कार्त्तस्वर
क्ष्माभृ द्रूप्यधरो प्युदित्वरझरीनादा दरोदी दरम् ॥ ३२ ॥

गोपाया मास धात्री च्चतुरुदधिमितां सो य मुर्वीमहेन्द्रो
मर्त्याधीश स्सुधर्मा स्थिति महितमति र्मत्तमातंगयानः।

मेत दित्यर्थः कथ मेत दित्याह मह च्च तत् पदं स्थान ञ्च महती सा च आप च्चतां कान्तया रमितः कान्तयेति कर्तृत्वोक्त्या रागातिशयो व्यज्यते तेन रागनिमित्ताना न्त स्य सौभाग्यादिगुणाना मुत्कर्षः कान्तार म्महारण्य मित श्च महारण्ये दुर्गपथे कान्तार मित्यमरः प्रतापः दूरा देवा रीणां भयजनकत्वं प्रकृष्ट स्ताप श्च स्वस्मिन् जनपदे तिष्ठ न्ती ति स्वजनानां प्रियात्मजादीनां पदे तिष्ठन्ती ति च स्वजनपदस्थाः ते च कण्टका श्च कण्टका दुष्टा स्सूक्ष्मप्राणि च अत्र तृतीयप्रकारश्लेषोऽलंकारः अय न्तु प्रकारो विशेषणसाम्य एव भवति अन्यथा ध्वनित्वापत्तेः स्रो स्रो ग खिदशयतिः प्रहर्ष णीयं ॥३१॥

उद्धार मित्यादि—भूभृतां महीधरा राजान श्च अद्धा अञ्जसा श्रद्धा लु रास्तिक्यवान् श्रद्धास्तिक्याभिलाषयो रिति वै कलधौतराशिं कलधौतं रूप्यहेम्नो रित्य मरः अर्पयितेव अचिरेण कालेन दास्यत्येव कार्तस्वरक्ष्माभृत् स्वर्णशैलः रूप्यधरः रज तशैल उदित्वरी उद्गमनशीला इण्नशिजीति क्वरप् झरी निर्झरः तस्या नादात् ना[illegible] दिश्य झरीना दव्याजा दित्यर्थः ल्यब्लोपे कर्मणि पञ्चमी वक्तव्येति पञ्चमी अत्र प्रकृ तं झरीनाद मपह्नुत्य रोदनत्वेन संभावितत्वात् सापह्नवोत्प्रेक्षा सा च इवादिविरहा त् प्रतीयमाना अंशेषा श्च परभूभृता मित्यादिश्लेषो नुग्राहकः तत्बलेन तस्या स्समुत्था पनात् सा च समुत्थिता समुत्थापकस्य चमत्कारनिबन्धन मित्यनयो रङ्गाङ्गिभावेन सङ्करः ॥ ३२ ॥

अश्रान्तं न्दानवारिप्रकरपरिलसत्पादपीठोपकण्ठो
यद्व त्मोद्दामधामा निखिलदिविषदां नायको नाकलोकम् ॥ ३३ ॥

कालेऽस्मिन् जन्य मासी त्गतमलवलभित्पालिते नाकलोके
त्रैलोक्यैश्वर्यलिप्सातरलितमनसा न्देवदैत्येश्वराणां।
नीत्या मुक्तःपरं विक्रम इह विजये न क्रमेते ति मत्वा
देवा वेगा त्प्रपन्ना धिषण मुरुनयं भार्गव म्पूर्वदेवाः ॥ ३४ ॥

जन्येजञ्जन्यमाने पुन रसुरजना जीवनीविद्यया ते
काव्येनाऽव्याकुलेन त्रिदशविशसिताः प्राणिता प्रीणिता श्च ।

एवं ततीययाति रित्यारभ्या ऽरोदीदरमित्यन्तै ग्रन्थै रस्य गुणगणा ननुवर्ण्य तादृग्गुणवत्वे संभाव्यमानं फल मप्य स्मि ञ्जात मिति दर्शयन् वर्णन मुपसंहरति. **गोपाया मासेति** गोपाया मास रक्षितवान् गुपू रक्षणे गुपूधूपीत्यायः कास्प्रत्यया दित्यामप्रत्ययः कृञ्चेत्यस्ते रनुप्रयोगः अमर्त्याधीशाः मर्त्याधीशा श्च सुधर्मायां स्थितौ महिता प्रवृद्धा मति रिच्छा यस्य शीमने धर्मे आस्थिति रास्था तया महिता पूज्यमाना मति बुद्धि र्यस्य सः मत्तमातंगः यानं वाहनं यस्यसः मत्तमातङ्गस्य यानमिव यानं य ति र्यस्य सः दानवारयस्सुराः दानवारि दानजलञ्च यद्वत् यथा अत्र श्लेषानुगृहीता वा क्यार्थोपमा ॥ ३३ ॥

अथ ययाते देवयानीशर्मिष्ठयो र्य्योर्द्विष्कर्की विवाहघटनां वक्तुं कथान्तर मार भते **कालइत्यादि**. गतमलेन वृत्रहत्यापापविमुक्तेन वलभिदा त्रयो लोका एव त्रैलोक्यं चातुर्वर्ण्यादित्वा त्स्वार्थे ष्यञ् लिप्सा लब्धुमिच्छा धातोः कर्मण इति सन् मनमीमे तीस् अत्र लोपोऽभ्यासस्ये त्यस्यासलोपः "स्कोस्सय्योगाद्यो" रिति सलो पः हलन्ता च्चेति कित्वात् गुणाभाव देवेश्वरा दैत्येश्वरा श्च तेषां न्द्वन्द्वः परं श्रूयमाणं सर्वनाऽव्यभिचारि नीत्या मुक्तः परं विक्रम इति केवलं पराक्रम एवेत्यर्थः न क्रमेत अप्र तिबन्धेन नक्राम्येत वृत्तिसर्गेति तद् वृत्ति रप्रतिबन्धः धिषणं बृहस्पतिं उरुनय मिति उभयो र्विशेषणं भार्गवं शुक्रं देवत्वात् भ्रष्टा इति पूर्वदेवा असुराः ॥ ३४ ॥

जन्य इत्यादि—जञ्जन्यमाने उभयेषा मपि नयविक्रमसंपत्या हतत्वा

भूय स्तै रस्तशङ्कै र्निजबलविलया न्निर्जितो निर्जरेन्द्रो
निन्ये दुस्था मवस्था ममरपरिषदा साक माकम्पभाजा ॥ ३५ ॥

उचित मिदं खलु मन्ये जन्ये विजितो य देष शतमन्युः ।
कस्य नु गुरुविद्वेषिण इह खलु न स्या त्पराजयो भूयान् ॥ ३६ ॥

॥ ग ॥ तदनु तेन मन्युमता वशीकृते नाकलोके दनुजचक्रेणा क्रान्ते पुन रपि निजवशापादनाशये व विधिविहितबहुमन्युना शत मन्युना विबुधनिवहेन सह विचार्या चार्यतनयः कचो निभृत मेव

दत्यर्थ ज्ञायमाने जीवनीविद्यया मृतसञ्जीवनी संज्ञया विद्यया अव्याकुलेन एकाग्रचि त्तेन विशासिताः हिंसिताः शसु हिंसायां अस्य " धृषिशसी वैय्यात्ये " इति वैय्यात्य एवाऽनिट्त्वनियमा दन्यत्र सेट्त्वं प्राणिता जीविताः अत एव प्रीणिताः प्रीतिं प्रापि ताः धू ञ् प्रीणने न्गुंणवकम्प इति नुक् निजबलविलया न्निर्जितो निर्जरेन्द्रः भूयः अस्त शङ्कै स्तै र्दुस्था मवस्था निन्य इत्यन्वयः अस्तीति उदित्वेन विभाषितेट्कत्वा यस्य वि भाषेति निष्ठाया मिड्भावः स्वसैन्यनाशा द्धेतोः पराजितो देवराजः पुन रस्तमरणभ ये रसुरै र्दुस्थां दुःखदुःखात्मना तिष्ठती ति दुस्था तां दुःखरूपा मिति यावत् सुपिस्थ इति कः अवस्थां कालकृतान्यथावस्थिति रवस्थेति सुबोधिन्यां निन्ये प्रापितः कर्मणि लिट् स्वनगरा च्च्यावन मिह दुरवस्थाप्रापणं ॥ ३५ ॥

उचितमित्यादि—योग्यं "उचित न्तु स्वभावे ऽपि निश्चिताभ्यस्तयोः पुनः योग्येचिरानुयाते च इति" केशवः शतमन्यु रिन्द्रः गुरवो बहवो विद्वेषिणो यस्य मृता नां पुन श्शुक्रेण जीवितत्वात् इहलोके भूयान् अतिशायने बहोर्लोप इतीयसुन ईकारस्य लोपः बहो र्भूभावः श्च अत्र गुरुषु निजाचार्येषु विद्वेषः गुरुविद्वेषः सोऽस्यास्ती ति गुरु विद्वेषी ति व्यज्यमानोऽर्थो वाक्यार्थ मुपस्करोति ॥३६॥

* तदन्वित्यादि—मन्यूनां क्रतूनां दनुजचक्रेण असुरसैन्येन " वरूथिनी बलं सैन्यं चक्र मानीक मस्त्रिया " मित्यमरः विधिविहिता बहवो मन्यवः क्रतवो येने ति प्रमुखतः प्रतीयमानं अर्थ मवेक्ष्य पुन रपीत्याद्युत्प्रेक्षा विधिना दैवशक्त्या विहि तो बहु र्वि पुलो मन्यु श्शोको यस्य तेन आचार्यतनयः बृहस्पतिपुत्रः आहितमख्ये वसतिं

मृतसञ्जीविनीविद्या मध्येतु महितमध्यवसते रुर्जस्वतीदयितस्य भा
र्गवस्य वसतिं प्रति प्रस्थापयामासे अनन्तर मन्तरंगसंगृहीतवलशा
सिशासनः कलितकमनीययौवनः कचो य मयत्नेन सपत्नसंहति
मभिबुभूष न्नराते रारातीय मपि दितिसुताचार्य क्षणा दभिबुभूषमा
णो महत्तरगुणोत्तरे मुहूर्ते स्वर्गतो निर्गत्य सर्वगीर्वाणदुर्वारगर्वनिर्वाणं
कुर्वाणं विकुर्वाणं वृषपर्वाण म्प्रकुर्वाणं कार्त्तिकेय मिव चित्रशिखण्डि
जाताधिरोहं वाल्मीकि मिव सिताच्छकाव्याभिख्यातं सकलतापरहित

वासो यस्य तस्य अनेन तस्य दुष्प्रापत्वं विचार्य कचः प्रस्थापयामास इत्यनेन तस्यै व नत्र सामर्थ्य मिति प्रकाश्यते ऊर्जस्वती दयितस्य अत्र बहुव्रीह्याश्रयणेन तस्या स्त त्वन्धुषु चाऽस्य प्रेमाविष्टता व्यज्यते तेन च तदनुसरणद्वारा कार्यसिद्धि रिति भार्गवस्य शुक्रस्य वसति मिलयं प्रस्थापयामासेन्द्रइत्यानं कारितः कर्मणि लिट्.

अनन्तर मित्यादि —अन्तरङ्गमनः सङ्गृहीतेत्यनेन स्वसाध्यस्य पैर रलक्ष्यत्व मुक्तं कमनीयेत्यनेन यौवनस्य प्रारंभावस्था प्रकाश्यते तेन वक्ष्यमाणदे वया न्याभिलाषस्य युक्तता अभिबुभूष न्नभिभवितु मिच्छन् सनन्ता लक्षणहेत्वो रिति शता हेतुः प्रयोजन ञ्च कारणञ्च अत्र कारणं सत्र प्राप्तिच्छायाः आरातीयं आरात् समीपे भवः वृद्धाच्छः अव्ययानां भमात्रे टिलोपो वक्तव्य " इत्यस्याऽनित्यत्वा ल्लोपा भावः बहिर्षाष्टिलोपोऽयञ्चे त्यत्र टिलोपवचन मस्याऽनित्यत्वज्ञापकं.

दितिसुतइति—" कृदिकारा दक्तिन " इति वा ङीप् अभिबुभूषाणः प्राप्तु मिच्छन् भू प्राप्तौ सनन्ता च्छानच् गुणोत्तर इत्यनेन ईप्सितकार्यसिद्धि रवश्यं भविष्यती ति द्योत्यते निर्वाणं विनाशं विकुर्वाणं हृष्टं " हृष्टमाणो विकुर्वाणः प्रमनाः हृष्टमानसः " इत्यमरः वृषपर्वाणं प्रकुर्वाणं सेवमानं गन्धनावक्षेपण इति सेवन आत्म नेपदं चित्रशिखण्डिनि विचित्रमयूरे जात मधिरोहणं यस्य चित्रशिखण्डिजातस्य बृह स्पतेः आधेरोहण ञ्च बाहुलकात् कर्त्तरि ल्युट् सिताच्छकाव्याभिख्यातं बहुनिर्मलका व्यत्वा दभिख्यातं प्रसिद्धं सित श्चाऽच्छश्चकाव्य श्चेत्यभिख्यात मासात ञ्च कवि रेव काव्यः चातुर्वर्ण्यादित्वा त्स्वार्थे ष्यञ् सकलतापै राज्यात्मिकादिभिः रहितं सकलताप सानां हित ञ्च खट्वां पर्यङ्कं खट्वा मारूढ मिति क्षेपाभावात् समासाभावः क्षमाया मारूढं भूमिष्ठं क्षमया आरूढ ञ्च यशे अभिलाषः नयज्ञेषु नयवित्सु च उपशल्यं लक्ष

मपि सकलतापसहितं खट्वा मारूढमपि क्षमारूढं यज्ञाभिलाषिण मपि नयज्ञाभिलाषिणं निजतनूजया देवयान्या परिशोभितोपशल्य. माद्यया विद्यया लापयमानमेनं भृगूणा माद्य मासाद्यऽऽभिवाद्य निर वद्यां गिर मिति गृणाति स्म ॥ २ ॥

आम्नायपारगमुनीन्द्र! कचो स्मि नाम्ना
धाम्नान्निधे भृगुवरां गिरसांगजन्मा।
विद्यां वरा मधिजिगांसु रयासिष न्त्वां
वत्स्यामि वत्सरसहस्रक मत्र वर्णी ॥ ३७ ॥

वाचं कचस्य विशदा मुशना निशम्य
विद्वा न्विचार्य बहुधा बहुधामधाम्नः ।

द्यया समीपमासवचनः पादोपशल्य इतिप्रयोग श्च आद्यया श्रेष्ठया मृयसञ्जीविन्येत्यर्थः आलापयमानं पूजां प्राप्नुवन्तं लियस्सम्मानशालीा ति सम्मानन आत्मनेपदं लिङ् श्लेष णे विभाषालीयते रित्यात्वे पुक् अभिवाद्यते आभिमुख्येन वाद्यते आयुष्मन् भवेत्याशी र्वादः कार्यतेनेनेत्यभिवादनं तूष्णीं स्थिते दोषस्मरणान् गृणातिस्म उक्तवान् अत्र सक लतापरहित मित्यादौ विरोधोऽलंकारः ॥ २ ॥

आम्नायेत्यादि—भृगुवर! अहन्नाम्नाकचो स्मि आंगिरसस्य बृहस्पते रङ्ग जन्मा पुत्रः किमर्थमित्राग्तो स्मीत्यत्रा ह वरां श्रेष्ठां विद्यामधिजिगांसुः अध्येतुमिच्छुः, इङध्ययने इङिकावद्ध्युपसर्गान्न व्यभिचरतः इङश्चेति सानिगमिरादेशः अज्झनगमामिति दीर्घः सनाशं सेत्सुः विद्या मित्यत्र नलोके ति षष्ठी निरोधः त्वा मयासिषं प्राप्तवान् अस्मि याप्रापणे यमरमेऽति सगिटौ अत्र विद्या मित्येव वक्तव्ये गुरा वनृतोक्ते रयुक्तत या मृतसञ्जीवनी मभिप्रेत्य परा मिति विशेषितवा निति मन्तव्यं आम्नायपारगेत्यनेना ऽध्ययनार्थ मागते रौचित्यं वत्सरसहस्रकं कालाद्ध्वनोरत्यन्तसंयोगे द्वितीया अनेना ऽध्ययनस्याऽन्तरानुपरमः प्रतार्यते वर्णी ब्रह्मचारी अनेना ध्ययनौचित्यं ॥ ३७ ॥

वाचमित्यादि—विशदा मसन्दिग्धार्थां सम्यक् विहितनिजाकूतार्थां इत्य

पुत्र म्पुरन्दरगुरो रुररीचकार
विद्यार्थिनी ह गुरवः परमानुकम्पाः ॥ ३८ ॥

मधुरै र्विविधैः श्लोकै र्विबुधामोद मादधत
अथ तं सरलं प्रोचे स कवि र्बुद्धिशक्तिभाक् ॥३९॥

हे वत्स गीष्पतिसुता ऽधिजिगांससे य
न्मत्सन्निधे स्त दधिका म्मुद मुद्वहामि ।
अद्धा सदा ध्ययनजागरिता निषींद
मद्धामनी द्धसुख मीप्सितसिद्धये त्वम् ॥ ४० ॥

प्रसन्नं सद्वृत्तं स खलु सदलंकार ममलम्
गुणाना मावासं सहृदयजनज्ञेयहृदयं।

र्थः विद्वान् विचारकुशलः बहूना न्धाम्नां तेजसां धाम सद्म तस्य बहुधामधाम्नः पुरन्द रगुरोः पुत्र मिति बहुधा विचारे हेतुः अत्रा र्थान्तरन्यासो लंकारः भृयोः कचोरीकर णस्य विशेषरूपस्या र्थस्य विद्यार्थिनीत्यादिना सामान्यरूपेणा र्थेन समर्थनात् सामा न्यविशेषकार्यकारणभावाभ्या र्भिर्दिष्टप्रकृतसमर्थन मर्थान्तरन्यासः ॥ ३८ ॥

मधुरैरित्यादि—श्लोकै र्यशोभिः पद्यै श्च पद्ये यशसि च श्लोक इत्यमरः विबुधाः देवाः विद्वांस श्च तेषा मामोद ममोद ञ्च बुद्धे श्शक्ति रकुण्ठितत्वं बुद्धि श्च शक्तिः कवित्वबीजरूप स्संस्कारविशेष श्च कवि श्शुक्रः काव्यकृ च ॥३९॥

हे. वत्से त्यादि.—अधिजिगांससे अध्येतु मिच्छसि जागरिता जाक रूकः ॥ ४० ॥

प्रसन्न मित्यादि—मुखविकासादिना प्रकटितप्रसादं अन्यत्र शुष्केन्धन। दिवत् स्वच्छजलवत् सहसैव यद्व्याप्नोत्यन्यत् प्रसादो सौ सर्वत्रविहितस्थितिः अन्य च्चित्तं सर्वत्र सर्वेषु रसेषु इत्युक्तलक्षणप्रसादगुणयुक्तं सद्वृत्तं शुभचरित्रं " आचारवृत्त चारित्रचरित्रचरणानिच " इतिवै साद्भि श्शोभने स्तत्तद्रसानुकूले वृत्ते युक्त ञ्च सद

महाशय्याविष्टं सुमहितपदं हृद्यचरितम्
सदासेव्यं काव्यं स्फुटरसमसेविष्ट च कचः ॥४१॥

प्रकृतिरुचिर मारात्प्रेक्ष्य सा पक्ष्मलाक्षी
कच मचकमतैनं न्देवयानी तदानीम्

लंकारं प्रकाशाधिक्यात् कुजादिताराग्रहेषु " मध्ये श्रेष्ठ मित्यर्थः " शकुबुगुशुचसाद्या वृद्धितोवीर्यवन्त " इतिवराहमिहिरः सन्तः प्रशस्ता अनुप्रासादय श्शब्दालङ्कारा उप मादयो र्थालंकारा श्च यत्र त दमल ञ्ग्राम्यादिभि र्दोषै रहितं मुख्यार्थहतिप्रभृतिभि श्च गुणाना माश्रितवात्सल्यादीनां माधुर्यादीना ञ्च प्रसादस्य गुणान्तर्भावे पि पृथग्गुणि रोजसि माधुर्ये चा वश्यकत्वेन प्राधान्यात् आवासं आवसत्यस्मिन्नित्यावासः स्थानं अधि करणे घञ् सहृदयजनै र्निपुणमतिभिः प्रशस्तहृदयेन सह वर्त्तत इति सहृदय इति सुबोधिनी सूक्तिविचारदक्षे जनै श्च ज्ञेयं हृद्यं हृत्गतं वस्तु गूढो भिप्राय श्च महती बृहती पूजिता च शय्या तल्पं " पर्यङ्कं शयनं शय्या तल्प ञ्चतलिमं स्मृत" मित्यभि धानरत्नमाला तस्या माविष्टं शय्या ग्रन्थगुंफः तया आविष्ट ञ्च " शय्या तल्पे ग्रन्थगुंफ" इति वै सुमहिते सर्वैः पूजिते पदे चरणे यस्य यद्वा सुमहिते सुमनोहरे एत त्सर्वाङ्गसौ न्दर्योपलक्षणं " भृगु स्सुखी कान्तवपुस्सुलोचनः कफानिलात्मा सितवक्रमूर्द्धज " इति वराहमिहिरः सुमहितानि तत्तद्रसानुगुणानि पदानि च यत्र हृद्यं हृदयप्रियं चरितं कर्म यस्य चरित मितिवृत्त ञ्च सदासेव्यं सद्भिरासेव्यं आसेवितं कर्ममात्रे क्तः सदा सर्वस्मिन् काले सर्वैकान्येति दा सर्वस्य स इति सादेशः आदिमे मध्यमे न्तिमे च वय सि व्युत्पत्तिविधायित्वा त्सरसत्वात् प्रायेण भगवत स्तद्भक्ताना ञ्च चरितवर्णनरूपतया परमपुरुषार्थसम्पादकत्वा च्च सेव्यं अवश्यं सेवनीयं आपकेकृत्यः काव्यं शुक्रं कविकर्म च स्फुटः स्निग्धवीक्षणादिभि स्पष्ट आत्मविषयो रागो स्नेहो यस्य स्फुटा श्शृंगारादयो रसा यत्र यत्र शब्दशक्तिमूलो वस्तुद्ध्वनिः " अलंकारो थ वस्त्वेव शब्दा यत्रा वभास ते प्रधानत्वेन स ज्ञेय श्शब्दशक्त्युद्भवो द्विधा " ॥४१॥

प्रकृतीत्यादि—प्रकृतिरुचिरं स्वतो मनोहरं आरा त्समीपे दूरेच आरा द्दूरसमीपयो रित्यमरः अचकमत चकमे कमे रुपसंख्यान मिति चङ् धवलं स्त्रीणा मितर्गरमणीयं श्वेत ञ्च निसर्गरमणीयो य स्त्रीणां स धवल स्मृतः रसो रागः जल ञ्च तर्ष स्स्पृहा पिपासा च एत द्व्याकुलत्वे हेतुः देवयानीप्रेम्णो पि कचस्य विद्यायां

धवल मधिकतर्षाशारद क्षीरदाग्र्यं
रसरहित मुदारं व्याकुला चातकीव ॥४२॥

॥ ग ॥अनन्तर मन्तेवासिसन्तानै र्निखिलनिगमागमनिपाठनिरतै स्संख्यावद्भि रप्यसंख्यावद्भिः परिगतपरिसरोभृगुकुलभाग्यां कुरो भार्गव शिष्यान्तरादृष्टचरगुणसन्दोहसन्दर्शननानन्धमानमानसो निरवद्यया मेधया निखिला मपि विद्या म्मुदा मेधायन्तं सकलसन्देह पंकविध्वंसिमिजवचनचातुरीविशेषविचनीकस्यमानवदनारविन्द मम राचार्यनन्दन मिम न्नन्दनीय न्नद्धा यमध्यापिपत् ॥३॥

दुर्ज्ञानार्थविबोधफुल्लहृदया वृत्तिः कचस्य ऽऽदृता
सै षा सम्यगतूतुष त्भृगुवरन्त न्देशिकाग्र्य न्तदा ।

त्तिहेतुभूतत्वा दिद मत्रोक्तम् ॥४२

अनन्तरमित्यादि—कन्तेवासिसन्ताने शिष्यसमूहेः शयवासेत्यलुक् निगमा वेदाः आगमा श्शास्त्राणि "आगम स्तूपदेशेऽपि शास्त्रेऽप्यागमनेऽपि" ति के निपाटः पठनं नौरदनदेत्यपो विकल्पे घञ् "निपाठनिपठौ पाठ" इत्यमरः संख्यावद्भिः पण्डितैः संख्यावान् पण्डितः कवि रित्यमरः असंख्यावाद्भि रियत्तारहितैः अदृष्टचरस्य अदृष्टपूर्वस्य भूतपूर्वे चरडि ति चरट् नानन्धमानं अत्यर्थं हृष्यत् मेधया धी र्धारणावती मेधे त्यमरः एत च्छुश्रूषाश्रवण ञ्चै व ग्रहण न्धारण न्तथा ऊहाऽपोहार्थविज्ञान न्तत्वज्ञान ञ्च धीगुणा इत्युक्ताना मन्येषा मप्युपलक्षणम् मेधायन्तं आशुगृह्णन्तं कण्वादिभ्यो यगिति यक् मेधा आशुग्रहण इति कण्वादौ सुबधातुवृत्तिः चातुरी चातुर्यं विचनीकस्यमानं अत्यर्थं विकसत् कस गतौ यङ् नीग्वञ्चिति नीगागमः नन्दनीय मन्दन मिवाचरन् उपमाना दिति क्यच् अध्यापिप दध्यापितवान् इङध्ययने विभाषा लुङ् लृङो रिति गाङभावे रूपम् ॥३॥

दुर्ज्ञानेत्यादि—दुर्ज्ञानः दुःखेन ज्ञायमानः आतो युजिति खलर्थे युच् फुल्लं विकसित आदृता अर्चिता अतूतुषत् तोषितवती तुष प्रीतौ लुङि णिश्रीति चङ्

वेलातीतरतान्तरेषु युवते स्सद्यो निरुद्योगता
रुन्धे मन्मथपावकेद्धमनसः पुंसो रिरंसा म्पराम् ॥४३॥

॥ ग ॥ तदनु तेन दनुजदेशिकेन निजानुवर्त्तनवरीवृत्यमानमोदया तदीयतनयया देवयान्या च सतत मपि परिलाल्यमानो य मप्रमाद्य न्नेव विद्याप्रपञ्च मस्मा दधीय न्पञ्चशतहायनी मतिवाहयांबभूव 65901 ॥ ४ ॥

॥ ग ॥ तदनु कदाचन काव्यकन्यकानियोगात् कान्तारान्तरसञ्चरसञ्चारितमहितमाहाकुलपालनाकुलो महाकुल स्स महेन्द्रगुरुनन्दन स्स्फुटतर मवगताकूतै रवसरप्रतीक्षै स्तत्क्षणाविकस्वरामर्षदीप्राक्षैः पार्श्विकै रायश्शूलिकैः कालव्यालकरालकरवालकराम्बितकरै रसुरनिकरैः करोपकर्षगृहीतो गीर्वाणगृध्न इत्यकृपायमाणैः कृपाणघातं हत्वा

वेला मर्यादा रुन्धे रुणद्धि रुधि रावरणे स्वरितेत् रिरंसां रन्तु मिच्छां अत्र दृष्टान्तोऽलंकारः बलवैधर्म्येण तोषहेतो र्वृत्ते विरुद्धस्वभावाया निरुद्योगतया प्रतिबिंबत्वेनोपादाना त्तस्याऽपि बिंबप्रतिबिंबभावे दृष्टान्तः तस्याऽपि साधारणधर्मस्याऽपि न केवल मुपमानोपमेययोः ॥४३॥

* तदन्वित्यादि—निजानुवर्त्तनेन वरीवृत्यमानः अत्यर्थं वर्त्तमानः मोदो यस्याः यङन्ता च्छानच् रीगृदुपधस्येति रीक अप्रमाद्यन् सावधान स्सन् मदी हर्षे अस्मा दधीयन् आख्यातोपयोग इति पञ्चमी उपयोगो नियमपूर्वकं विद्याग्रहणं अधीयन् अकृच्छ्रेण पठन् इङ्धार्यो श्शत्रकृच्छ्रिणी ति शता पञ्चशतहायनीं पञ्चशतं वत्सरान् अतिवाहयांबभूव अति वाहितवान् ॥४॥

तदन्वित्यादि—सञ्चरो मार्गः गोचरसञ्चरेति निपातः माहाकुलं गोकुलं माहाकुलः महाकुलस्या ऽपत्यं महाकुला दित्यण् आकूत मभिप्रायः मृतसञ्जीवनी जिघृक्षा गीष्पतिसुतस्य विद्यार्थं मागतिः माहाकुलत्वे निकृष्टकर्मणाऽपि गुरुप्रसादनाभिसन्धि श्चाकूतावगतौ हेतुः अवसरं प्रतीक्षन्त इत्यवसरप्रतीक्षा ईक्षि क्षमिभ्याञ्चे

प्रत्यवयवं शकलीकृत स्सहसा वृकसमुदायायोदीयमानमोद मदी
यत ॥५॥

विलय न्त न्नयन्तो थ छलयन्तो भृगूद्वहम्।
कलयन्तः परा म्प्रीति न्निलय न्ते निजं ययुः ॥४४॥

याते जीवात्मजाते वन मतिविधुरा भार्गवी मार्गवीथीं
दत्ताक्षी साय मेषा धृतकुतुकभरा त म्प्रतीक्ष्यैव तस्थौ।
गोलां गोप्त्रा वियुक्ता मथ समुपगतां वीक्ष्य सा कातराक्षी
तात न्तातप्यमाना निजहितनिरतं गद्गदां गा मगादीत् ॥४५॥

ति णः विकस्वरः विकसनशीलः स्थेशभासिति वरच् दीप्रे दीपनशीले नमिकंपीति रः पार्श्वकैः पार्श्वास्थितवत् कुटिल उपायः पार्श्वं तेना र्था नान्विच्छन्तः पार्श्वकाः पार्श्वेना न्विच्छतीति कन् आयशूलिकैः तीक्ष्णोपायोऽयश्शूलंतेना र्था नन्विच्छन्तः आयश्शूलिकाः अयश्शूलेति ठक् करंबितो युक्तः "पृक्तः करंबितो मिश्रः च्छुरितो मिलित स्तथा" इति शब्दरत्नाकरः करोपकर्ष करे उपकृष्य सप्तम्या ञ्चेति णमुल् गीर्वाणगृह्यः देवपक्ष्यः पदास्वै रिति गृह्येः क्यप् कृपावन्तो भवन्तः कृपायमाणाः तेभ्यो न्ये अकृपायमाणा भृशादिभ्य इति कर्म्मणि क्यङ् कृपाणघातं हत्वा, कृपाणेन हत्वा करणे हन इति णमुल् कषादिष्विति तस्यैव धातो रनुप्रयोग. समुदय स्समूहः ॥५॥

विलयमित्यादि.—विलय मन्तं लीं द्रवीकरणे एरच् च्छलयन्तः च्छो च्छेदने च्छ्यति च्छिनत्ति धर्मार्थानुसारिणं मार्ग मिति च्छद्म तत् कुर्वन्ती ति च्छलयन्तः कलयन्तः प्राप्नुवन्तः कल गतौ संख्यानेच ॥४४॥

यातइत्यादि.—मार्गवीथीति अत्र वीथीशब्देन पङ्क्तिवाचकेन मार्गस्य अभ्यायतत्वं लक्ष्यते तं प्रतीक्षत इति तत्प्रतीक्षा टाप् गोलां गोसमूहं खलगोरथादि त्रिनकट्यच श्चेति त्रः गोप्त्रा पालकेन तातप्यमाना अत्यर्थं तापयुक्ता तप सन्तापे यङन्ता च्छानच् गद्गदां स्खलिताक्षरां ॥४५॥

यातो वनाय [illegible] गवां तनवाय तात

गा गा स्तव स्त तु गवां समज स्तव[illegible]त् ।

हा हन्त हन्त कि मिद स्तमसा दिगन्त

मावृण्वतीय मयते क्षणदा क्षणेन

श्रुत्वा ता न्दुश्रवां गा न्मृत इति मृतसञ्जीवनीविद्यया यं

शिष्याणा माजुहाव त्रिदशगुरुसुतं भार्गवो भर्गधामा ।

भित्वा भित्वा वृकाणां [illegible] जठरतल न्पूर्ववत्पूर्णकायो

जीव जीवात्मजो सौ [illegible] निजगुरो रग्रतः प्रादुरासीत् ॥४

तदनु गुरुचरणपरिचरण[illegible]विचक्षणो सौ धिषणसूनु रुरुणा करुणा

भरेणैव गुरुणा मुना प्रतिपादित[illegible] ह मिति संचरन्निसुत्वरभक्ति

भारभरितान्तरंगो मुहुर्मुहु रमु न्मसमरप्रेमरसपरिप्राण न्माणं

सीत् ॥६॥

यातइत्यादि.—वनाय वनं यातः गत्यर्थेति चतुर्थी सः तेन नीतः

समजः गोगणः तु अजगतिक्षेपणयोः समुदो रज इत्यप् समागात् सम्नवायतः [illegible]

द मत्र हेतुः कः हाहन्तहन्तेति विषादद्योतक्ये पथि केना पि हेतुना विलंबितः

मायास्यति वेत्यत्राह तमसेत्यादि आवृण्वती तिरोदधाना अयते अय पय गतौ

न वेगेन कथापायशंकाविष्टत्वेन निशाएते वेगातिशयवत्वप्रतीतिः ॥

श्रुत्वेत्यादि,—दुःश्रवा दुःखेन श्रूयमाणा जीवनीविद्यया आजुहाव स[illegible]

नामधुक न्तन्मन्त्रं उपासितवान् इत्यर्थः शिष्याणा मायं [illegible] वात्सल्यातिश[illegible]

उक्तः त्रिदशगुरुसुत मित्यनेन [illegible] पि तस्य [illegible] गुरुत्व [illegible]

[illegible] प्रवृत्तिमैत्यविभरतीति प्रादुरासीत प्रादुर्बभूव [illegible]

* तदन्वित्यादि—गुरुचरणपरिचरणचतुरं [illegible] ति [illegible]

[illegible]

[illegible]